No. ४५७४

Title और्ध्वदैहिक पद्धतिः

Author विश्वनाथः

Extent ७१ पत्राणि Age +

Subject धर्मशास्त्रम्

और्ध्वदेहिकपद्धतिः

४५७४

त्रिं पापं तज्ज्ञानाज्ञानतः कामाकामसकृदसकृत्कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्त
पीतापीतसकलपातकोपपातकगुरुलघुपातकसंकलीकरणमलिनीकरणपात्रीकरणजातिभ्रंश
करप्रकीर्णपातकानां निरासार्थमनुग्रहं कृत्वा प्रायश्चित्तमुपदिशंतु भवंतः। तत्र प्रार्थना। सर्वधर्मविवे
क्तारो गोप्तारः सकला द्विजाः। मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः। मया कृतं महाघोरं ज्ञातमज्ञातकिल्बि
षं। प्रसादं क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ। पूज्यैः कृतपवित्रोहं भवेयं द्विजसत्तमैः। एवं प्रार्थयेत। पुनरपि द्वि
त्वा प्रायश्चित्तकर्ता तद्यत्र स्वकृत्स्थाने तन्नाम निर्दिशेत। तत्र [illegible] सर्वधर्मविवेक्तारो गोप्तारः सकला द्विजाः
। अस्य देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः। एतत्कृतं महाघोरं ज्ञातमज्ञातकिल्बिषं। प्रसादं क्रियतामस्य शु
भानुज्ञां प्रयच्छथ। पूज्यैः कृतपवित्रोयं भवेथा द्विजसत्तमैः। प्रार्थनानंतरं ममानुग्रहं कुर्वंतु भवंतः। इति प्रणमेत। त
तस्तेन मुख्याय तत्स्वशरीरं दृष्ट्वा दिशाक्तिं नुतन्मम मध्यमादिपत्नां श्च विचार्य ब्रह्मन्नस्मिन्देहे पापं क इति निश्चित्य पुस्त
कवाचनपूर्वकं कथयेत्पुरस्तु वारं कस्माग्रे प्रसाद्यान्प्रायश्चितं स्वपुः। अस्मिन् काले प्रायश्चित्तं चेत्स्वपुण्याहि दि
पुस्तकपूजां सभ्यानुवाचकपूजां विधाय निवेद्य पूजां तेन किंचिद्द्रव्यं शक्तिस्थं निधाय पठनीयं जगित्पुटे नमस्ति ष्ठ

लि

ता अनुवारकापचपापानुसारेण निःकृतिरूपां दक्षिणां दद्यात्। ततोऽनुवारकपूर्वोक्तविशेषेण विशिष्टानां पू
र्वोक्तानां महापातकमनतिरिक्तानां पातकानां रूपोऽनेन पर्षदुपदिष्टेन सर्वप्रायश्चित्तेनामुकप्रसादात्पापक्षया
माप्तौ दीर्घांगसहितेनाचीर्णेन नष्टं भविष्यति। तेन त्वं कृतार्थो भविष्यसीत्युपदिशेत्त्रिः। तच्च सर्वप्रायश्चि
त्तं शक्त्यनुसारेण षडब्दं अर्धं मासं ... पर्षदनुमतं प्रत्याम्नायं पाप्नुयात्। गोप्रत्यपुनर्जपेगापत्याति लहो
मसहस्रं द्वादशब्राह्मणभोजनं तीर्थयोजनं पात्रायां एकगोदाने सुवर्णरूप्यनिष्कं तदर्धं ... तत्त्रयीनां गोमू
ल्यानां शक्त्यादाने शुष्ककेशमध्ये दशन्नाने बुद्धिगुणाद्वादशाभ्यामावनोत्तरोत्तरचैकमाजापत्य इति। तत्र शक्त्या
मान्ने द्विगुणाद्यं ... ॥ निष्कश्च लोकशास्त्रयो रेकवाक्यतायां माषा ४० तदर्द्धं २० तदर्द्धं १० सुवर्णं सुवर्णं
तदशक्तौ रजतं ग्राह्यं। ततोऽनिवेदितं प्रायश्चित्तं भवदनुग्रहदत्तं अंगीकृत्य सन्मानपूर्वं प्रणम्य पर्षदं विसर्जयेत्। अप्रि
न्दहनिशक्तो नोपवासः कार्यः। इतरेण हविष्याशनं। ततः कस्मिंश्चिद्दिक्तायां तिथौ अथवा तद्दिने कृतमाध्या
ह्निकः सायाह्ने गंगादेशकालौ संकीर्त्य अमुकशर्मणो मम जन्मप्रभृत्यद्यदिनं यावज्ज्ञाताज्ञातकामाकाम
सकृदसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकानुपातकोपपा

शुद्धि २ 2

९ राम० २

नकलघुपातकसंकलीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णपातकानां निरासेन मर
णकाले शुद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं च वस्त्रमुकुष्णापश्चिमे स्वमुकुष्णामात्रापेन प्राच्योदीच्यां गमसहितं यथा
शक्तिमहं करिष्ये। इति संकल्प्य। यानि कानि च पापानि ब्रह्महत्यासमानि च। केशानाश्रित्य तिष्ठन्ति तस्मात्के
शान्वपाम्यहं। इति मंत्रेण शिखावर्जं केशोपस्थवर्जं नखरोमाणि वापयित्वा। ततः प्रागुदीच्यां दशांगुलं दंतका
ष्ठेन। आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च। ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पते इति मंत्रेण दंतान् शोध
तूष्णीं स्नात्वाचम्य भस्मादिदशविधिना स्नानं कुर्यात्। तत्र भस्मना स्नानमेवं। यथाग्निर्दहते भस्म तत् अश्वक्रांते
रथक्रांते विष्णुक्रांते वसुंधरे। शि[illegible]प्राणकाष्ठादिभिः सर्वपं। तथा मे दह्यतां पापं कुरु भस्म शुचे शुचिं। न मस्ते दहे
ति भस्मस्नानं। अथ मृत्तिकास्नानमंत्रः। अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे। शिरसा धारयिष्यामि रक्षस्व
मां पदे पदे। उद्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतं। मृत्तिके ब्रह्मदत्तासि
काश्यपेनाभिमंत्रिता। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं इति मंत्रैः अंगोद्वर्तनं। इदं विष्णुरिति त्रिभिः मृत्तिकाला
नं। अथ गोमयं। गोमये वसते लक्ष्मीः पवित्रं सर्वमंगलं। स्नानार्थं संस्कृतं देव पापं मे हर गोमय। अग्रमग्रं चरंतीना

३ गवां क्षुरेण निर्दिष्टं यद्रजो गगनं गतं ॥ शिरसा तन्नमस्येऽहं महापातकनाशनं ॥ पं॰ ३

मोषधीनां वने वने। तासाममृतपत्नीनां पवित्रं कायशोधनं। यन्मे रोगं च शोकं च तन्मे हरतु गोमयं। गोमयस्नानमिति गोमयं। अथ वा पानं स्नानमिति। अथ पंचगव्यं एकत्र कृत्वा स्नानं। गोमूत्रं गोमयं क्षीरं दधि सर्पिस्समन्वितं। सर्वपापविशुद्ध्यर्थं पंचगव्यं पुनातु मां सहस्रशीर्षेति। अथ गोरजस्नानं। अथ धान्यस्नानं। धान्यौषधि मनुष्याणां जीवनं परमं स्मृतं। तेन स्नानेन देवेशि मम पापं व्यपोहतु। धान्यमसि मंत्रः। अथ फलस्नानं। वनस्पतिरसो दिव्यः फलपुष्पसमृद्धिमान्। तेन स्नानेन मे देव फलं प्राप्तमनंतकं। याः फलिनी। अथ सर्वौषधी। ओषधीः सर्ववृक्षाणां तृणगुल्मलतास्तु याः। दूर्वा सर्षपसंयुक्तास्सर्वौषध्यः पुनातु मां। ओषधयः सम॰ अथ कुशोदकं। कुशमध्ये स्थितो ब्रह्मा कुशमध्ये जनार्दनः। कुशाग्रे शंकरो देवस्तेन नश्यंतु पातकं। देवस्य त्वेति कुशोदकं। अथ हिरण्यस्नानं। हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे। आकृष्णेनेति हिरण्यस्नानं अथ गंगास्नानं। विष्णुपादाग्रसंभूते गंगे त्रिपथगामिनी। धर्मद्रवीति विख्याता पापं मे हर जाह्नवी। गायत्री मंत्रेण। एवं स्नानानि आमंत्रकाणि स्नानानि। पुराणमंत्राः पठनीयाः। एवं दश विधिस्नानानि विधाय पुनः स्नानविधिनाऽऽस्नानं। स्नानांगतर्पणं धौते वाससी परिधाय तिलकं विधाय। कुशोदग्रहो। आ

राम ३

धं·

चमनं प्राणायामः। कृतमाध्याह्निकः प्रायश्चित्तांगं विष्णोः षोडशोपचारैः पूजनं। प्रायश्चित्तांगं वैष्णवश्राद्धं वि
ष्णो स्तनेत्रेपार्ध्यं· चंदनं पुष्पं। आचमनं। इदं विष्णुरिति द्विर्मधः। वैष्णवश्राद्धोपहाराणां पवित्रतास्तु। देशका
ल· ग्रथेमाहि· एवंगुणविशिष्टायां पुण्यतिथौ प्रायश्चित्तांगं वैष्णवश्राद्धं करिष्ये। विष्णवे इदमासनं। इदम
र्घं चंदनं पुष्पं। धूपदीप· यथाभागं धाघर्षनं विष्णवे स्वाहा। इदं वो संतिः। वैष्णवश्राद्धस्मान्येन विधेः परिपू
र्णमस्तु। आचमनं। विष्णुप्रीतये विप्रोऽधिकान् युग्मान् ब्राह्मणान् श्रद्धापूर्वकं भोजयेत्। आमान्नं वा दद्यात्। तृप्ता
न्हितादिकरणं। वैष्णवश्राद्धप्रतिष्ठासिध्यर्थं दक्षिणां विष्णवे स्वाहा। अघमर्षोक्ति· वैष्णवश्राद्धं परिपूर्ण

नः ७

मस्तु। तत्प्रायश्चित्तधेनुदानं। प्रायश्चित्तधेनुदानमंत्रः। प्रायश्चित्ते हरो ब्रह्मा प्रायश्चित्ते हरो हरिः प्रायश्चित्ते हरो
रुद्रगोमेकं च ददाम्यहं। पूर्वजन्मसहस्राणि पूर्वजन्मशतानि च। तस्सर्वं नाशमायांतु गोमेकं ददतो मम धेनुके स
र्वभूतानामसि त्वं पापनाशिनी। पापानि मे निमग्नं मां समुद्धर नमोऽस्तु ते। महालक्ष्मीः। अथ यथार महाराकुपात अथ
स्थंडिले पंचसंस्कारान् कृत्वाग्निस्थापनं। संकल्पः। अद्येत्यादि प्रायश्चित्तस्य प्रत्यागंत्वाहुतिहोममहं करिष्ये। ध्याने
न व्याहृतिभिः। आज्यसंस्कारः पर्युक्षणं कुर्यात्। ॐ भूः स्वाहा। इदमग्नये। ॐ भुवः स्वाहा इदं वायवे न मम। ॐ स्वः स्वा
येनमम। ॐ

५

४

हा॰ इदं सूर्याय ॐ भूर्भुवस्स्वः स्वाहा इदं प्रजापतये न मम। एवं सप्त वारं। आहुति २८। पुनः प्रकीर्णपापप्रशमार्थं य
था शक्त्या तिलहोमः। अथवा होमद्रव्यं ब्राह्मणाय वा दद्यात्। व्याहृतिहोममपि सर्वं मनः संकल्पितं घृतम् अग्नि
वायुसूर्यप्रीत्यर्थं ब्राह्मणाय हरये। तेन व्याहृतिहोममपि द्विरस्तु। तत उदीच्यां गं वै स्म वस्त्राद्यं। ततः स्थुलसी
द्धी सतानगृही। त्वाश्वघेसाहिमम जन्मप्रभृति अघहितं यावत्तस्माहि पूर्वीकृ अपोगाद्यारणोप्रधानसंकु
स्यः। अनेकपापहरणार्थं एतावत्संख्याकान् ब्राह्मणान् अमुकहावा ब्रह्मा च रिष्ये तेन पापहा महाविष्णुः प्रीय

तां ६

तां। अनेन प्रायश्चित्तकृतेन अमुकगोत्रोऽहं अमुकशर्माहं निःपापो भूयासं इति त्रिर्वाच्यं। एवं वारत्रयं द्विजमुखा
त् श्रुत्वा समग्रोपविष्टब्राह्मणानां पापाभिवेदनं। मम पापप्रशमरूपं एतावत्संख्याकं प्रायश्चित्तं परिपूर्णमस्तु
अस्त्विति ब्राह्मणो ब्रूयात्। प्रायश्चित्तमप्य उदीच्यां गं व्याहृतिहोमम संकरिष्ये। पूर्ववत् आहुतिः २८। प्रायश्चित्तांगं प
व ब्राह्मणभोजनसंकल्पः। द्वितीयगोमिथुनदानं। ततोऽन्तःकरणार्थं पंचगव्यः कार्यः। पंचपुटे। गायत्र्या गोमूत्रप
लार्धं। गंधद्वारेति अंगुष्ठपर्वार्द्धपरिमितं गोमयं। आप्यायस्वेति पलद्वयं दुग्धं। दधिक्राव्णो इति पलत्रयं दधि। घ
तं मि मिक्ष इति पलमेकं घृतं। आपोहिष्ठेति पलमेकं कुशोदकं। ताम्रायाः गोमूत्रं। श्वेतायाः गोमयं। कपिलायाः

राम॰
४

२ पृथि ० २ विष्णवे ... दं २

गो

क्षीरं नीलायाः दधि कृष्णायाः घृतं । प्रणवेनालोड्य । पलाशकाष्ठेन निर्मथ्य । प्रणवेनाभिमंत्र्य । समुपवेश्य हरितकुशै
र्दशाकृतीन् जुहुयात् । पृथिव्यै स्वाहा । इदं । विष्णवे स्वाहा । इदं । रुद्राय स्वाहा । इदं । वरुणाय स्वाहा । अग्नये स्वाहा । सोमाय
स्वा० सूर्याय० प्रजापतये० अंतरिक्षाय० स्विष्टकृते स्वा० इति हुत्वा० व्रतग्रहणं करिष्ये । इति द्विजान् पृष्ट्वा तैः कुरुष्वेत्य
नुज्ञातः प्रणवेन सर्वं पिबेत् । अशक्तो गोमूत्रादि स्वसंग्राह्य । सर्वमपि प... । अस्मिन् दिने उपवासः । अश
क्तस्य हविष्याशनं । भुक्त्वा वलोकनं । सूर्यावलोकनं वा । एवं प्रायश्चित्तं कृत्वा । शक्तः पंचदश दानान्यपि कुर्यात् । गो
भू तिल हिरण्याज्य वासो धान्य गुड रजत । रूप्यं लवणमित्याहुर्दश दानानि पंडिताः स्मृतानि । तत्र प्रथमं गोदा
नं । गवामंगेषु तिष्ठंति भुवनानि चतुर्दश । यस्मात् तस्मात् शिवं मे स्यादिह लोके परत्र च । इति मंत्रेण गौर्देया । अथ भू
मिदानं । सर्वभूताश्रया भूमिर्वराहेण समुद्धृता । अनंतपुण्यफलदा अतः शांतिं प्रयच्छ मे । अथ तिलाः महर्षे
र्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः । तस्मादेषां प्रदानेन मम पापं व्यपोहतु । ३ । अथ हिरण्यं हिरण्यगर्भ
गर्भस्थं हेमबीजं विभावसोः । अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे । ४ । अथाज्यं । कामधेनोः समुद्भूतं सर्वक्र
तुषु संस्थितं । देवानामा... समाहारमतः शांतिं प्रयच्छ मे । ५ । अथ वस्त्रमंत्रः । शरणं सर्वलोकानां लज्जा...

स्या

५

रहस्यानां परं स्तुवे वषधाविवस्त्रुलेश्व तः शांतिं प्रपद्ये ॥६॥ अथ धान्यं समर्वेदंवमपं ध्यात्वं सर्वेतत्त्रिकरं महत्त्वा प्राणिनां जी
वनोपायमतः शांतिं प्रपद्ये ॥७॥ अथ गुडदानं मे । सर्वरक्षानां प्रवरं मनोज्ञं ततः । सम तस्मात्स्वरलक्ष्मीदद स्व गुडम
द्य ॥८॥ अथ रूप्यं प्रीतिर्यतः पितृणां च विष्णुः शंकरयोः सदा । शिवनेत्रोद्भवं रूप्यमतः शांतिं प्रपद्ये ॥९॥ अथ
लवणदानमंत्रः । यस्मादन्नरसाः सर्वे नोत्कृष्टं लवणं विना । प्रियं च शिवयोर्नित्यं तस्मात्त्वं शंप्रदं भवेत ॥१०॥ एवं दशदा
नानि दत्त्वा मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर । यन्मया चरितं देव परिपूर्णं तदस्तु मे । इति चन्द्र विष्णुं स्मरेत् । एतानि दत्त्वा
दानानि समस्तैर्मूल्यं वा तत्समं भवेत्सम्मेलापिता । ततः यजमानः कृताञ्जलिः प्रायश्चित्तं तदच्छिद्रमस्त्विति कर्त्रोक्तेः छिद्रम
स्त्विति ब्राह्मणाः प्रतिब्रूयुः । यद्वा । यत्र छिद्रं तपच्छिद्रं यच्च कर्मणि । सर्वं भवतु मेच्छिद्रं यस्य वै छत्तिनं द्विजाः इति प्रतिवचनं
॥ निर्द्दिष्टं नश्चेत ॥ गौर्यथा चारित्रकुर्यात ॥ अथ गृहं सा प्रायश्चित्तविधेः परिपूर्णतास्तु ममसत्या विष्णुं संप्रेक्ष्य ॥ एतत्प्रायश्चि
त्तमसत्क्लेबं पदाहिपिंडाद्दिर्नत्ततोपातकमत्रा निष्क्रयेपुत्रादिनेदमवश्यं कार्यं । अनिष्क्रये आवश्यकं पुत्रादिनाक
रणे पंचगव्यप्राशनाभावः ॥ इति देहशुद्ध्यर्थप्रायश्चित्तं ॥ ॥ अथ वैतरणीदानविधिः । आचम्य । प्राणायामान्
कृत्वा संकल्पोपचारैर्विष्णो पूजनं विधाय गवादि उपकरणानां प्रोक्षणं कृत्वा अर्घ्ये साम देश काल स्मरणादि कृत्वा पूर्वव

यप्ति ६.२

राम०
५

त्मने सुकृतापन्महाघोरस्थितवैतरणीपारख्येन घृतशरणार्थं गोदानमहं करिष्ये। ब्राह्मणायापादप्रक्षालनं। गंधमाल्यवस्त्रादि
भिर्यथाशक्त्यभ्यर्चितद्दक्षे शिवा आपः सन्तु। सौमनस्यमस्तु। अक्षतं चारिष्टं चा॰। पयस्केपतद्दस्तु। उपसापतत्स्वतिहि
नम॰ यजमानस्याभिषेकः। दीर्घमायुः शांतिपुष्टिस्तुष्टिश्चास्तु। सवत्सायाः धेनोः पूजनं। कुलवस्त्रस्रक्माल्य
सुवर्णशृंगाद्यलंकरणं। अथ धेनुप्रार्थनामन्त्रः। धेनुके त्वं प्रतीक्षस्व यमद्वारे महापथे। उत्तितीर्षुरहं भद्रे वैतरण्यै
नमोऽस्तु ते। अथ ब्राह्मणप्रार्थनामन्त्रः। विष्णुरूप द्विजश्रेष्ठ भूदेव पंक्तिपावन। तर्तुं वैतरणीमेनां कृष्णां गां प्रददाम्यहं।
इति ब्राह्मणं प्रार्थ्य महिरण्यं गोपुच्छमादाय। अघेत्यादि॰ वैतरणीसंतरणार्थमिमां गां सवत्सां कुलवस्त्रस्रक्मा
ल्यादि सुवर्णशृंगाद्यलंकृतां गंधपुष्पाद्यर्चितां कांस्यदोहनीं शास्त्रोक्तगुणफलावाप्त्यर्थं अमुकगोत्राय अमुकदे
वशर्माव्याधि अमुकशर्मणे ब्राह्मणाय विष्णुरूपाय तुभ्यमहं संप्रददे। प्रतिगृह्णामि स्वस्ति ब्राह्मणो वदति। दान
प्रतिष्ठासिध्यर्थं सुवर्णदक्षिणां। नममेसुकृता विप्रहस्ते जलं क्षिपेत्। गोदानमंत्रः। संयमस्य द्वारेऽघोरे वैतर
णीं नदीं। सुरभिनोऽत्र तारणाय प्रगृह्णामि धेनु नमोऽस्तु ते। नमो वैतरणि देवि रूपं कुरु ममोपरि। दुर्गमे चैव यस्मा गंत
रिष्ये त्वत्समागतः। यमद्वारे महाघोरे कृष्णा वैतरणी नदी। तां तर्तुकामो यच्छामि कृष्णां वैतरणीं तु गां। उच्छ्रेय मह

स्मा

६

6

ष्णां

वेगतस्मां वैतरणीं नदीं । तर्तुकामः अपश्यन्ति कृष्णां वैतरणीं च गां ॥ यास्ता वैतरणी घोरा भूपशोणितसमाकुला
ः दत्ता घुमर्वकामा याः कृष्णा वैतरणी च गां । गवामंगेषु तिष्ठन्ति भुवनानि चतुर्दश । यस्मात्तस्मात् शिवं मे स्यादिह लो
के परत्र च । प्रदक्षिणा नमस्कारमंत्रः । गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः । गावो मे हृदये सन्तु गवां मध्ये वसा
म्यहं । पंच गावः समुत्पन्ना मथ्यमाने महोदधौ । तासां मध्ये तु या नन्दा तस्यै धेन्वै नमो नमः । अनेन प्रदक्षिणतां धेनुं ब्राह्म
णेन समर्पितां यथाशक्ति भूयसीं दक्षिणां । अथ पूर्वोक्तरितः वैतरणीदानं परिभ्रष्टं यस्तु कृष्णा गौरभावे अन्यवर्णा
पि देया गौरभावे द्रव्यं देयं । तस्याशक्तो पुत्रादिर्दद्यात् । तत्र आद्यमंत्रे । उ[illegible]र्बुरक्ष मिति पठेत् द्वितीये तं तुं वैतरणी नीः
मस्येति । तृतीये तां तर्तुमस्मीति ॥ इति वैतरणीधेनुदानविधिः ॥ अथ ऋणधेनुदानं ॥ एकवर्णा ऋणधेनुः कृष्ण
वर्णा पापधेनुः । धवला मोक्षधेनुर्दानेन या कल्पितास्त्वमनुष्याणां मृणपर्द्वे विविधं मम । तस्मात्त्वं मुक्तो भवाम्य ऋणधेनु
दानेन सांप्रतं । स्वधर्मविहितामपि कं सततं सम्मार्जितं ऋणां तत्सर्वं मुक्तिमायान्तु गोमे कं दद[illegible]तो मम मा देवमनुष्यपि
तृणां ऋणत्रयविमोचनं । इह लोके पुपकिंचित्तं दृणं सोपशांत ये । अथ पापधेनुदानमंत्रः । आजन्मप्रोपार्जितं पापं म पाप.
नोवाक्कायकर्मजं । तत्सर्वं नाशमायातु गोप्रदानेन केशव । अथ मोक्षधेनुदानमंत्रः । मो हं देहि दत्वी केशवो हं देहि जन्म ६

म्नो

गत्वते । गोरूपं धेनुप्रदानेन मुक्तः श्रीपतिना मितिः ॥ अथ मन्त्रार्घः । त्वं धेनु सर्वभूतानां कामदा मोक्षदायिनी । गृहाणार्घ्यं मया दा
त्तं देहि मोक्षं च सुव्रते । अथ महिषीदानमन्त्रः । इन्द्रादि लोकपालानां या राजमहिषी शुभा । महिषीदानमाहात्म्यात् सा
अस्तु मे सर्वकामदा । धर्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः । महिषासुरस्य जननी या सा अस्तु वरदा मम । अथाश्वदानं । गं
धर्वकुलजातोयं अश्वो देवेन्द्रवाहनः । तस्मात् अश्वप्रदानेन हयग्रीवः प्रसीदतु । अथाष्टमहादानं । तिलालोहं हिरण्यं च
कार्पासं लवणं तथा । सप्तधान्यं क्षितिर्गावं महादानानि चाष्टमं । प्रथमं तिलदानं । तिलाः श्वेतास्तिलाः कृष्णास्तिलागो
मूत्रसंभवाः । ते मे हरन्तु पापानि शरीरेण कृतानि च । इमास्तिलाः सोमदैवता स्वधायवृष्टिता नृतिलदानफलवास
र्थं कस्मै विप्राय विष्णुरूपाय हं तस्मै । एवं सर्वव्रतेयं । ततो लोहदानं । यस्मादायसकर्माणि तदधीनानि नित्य
शः । लांगलायुधादीनि अस्य तस्मात् शांतिं प्रयच्छ मे ॥ इदं लोहमग्निदैवतं । ततो हिरण्यदानं । हिरण्यगर्भगर्भस्थं हेमबीजं
विभावसो । अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे । इदं सुवर्णमग्निदैवतं । ततः कार्पासं । येन सूत्रेन दीपं ते भूर्भुवस्वपि
ति क्रमात् । ब्रह्माद्याः देवताः सर्वे कार्पासेन तु तोषिताः । इदं कार्पासं बृहस्पतिदैवतं । ततो लवणदानं । यस्मादन्नर
साः सर्वे नोत्कृष्टं लवणं विना । पितॄणां च विपंत्रिसं तस्मात्स्वर्गाय मे भवेत् । इदं लवणं विष्णुदैवतं । सप्तधान्यं । अन्नं प

वे

ना

क्षा

जापतिः मा(क्षा)स्त्रमेव जनार्दनात् । अन्नाद्भवन्ति भूतानि जगदन्नेन वर्धते ॥ इदमन्नं समधान्यं प्रजापतिदैवतं यमदैवतं प्री
त्यर्थं । ततो भूमिः । समुद्रवसना देवी भूतधात्री च वैष्णवी । सा मे हरतु पापानि जन्मान्तरकृतान्यपि ॥ इमां भूमिं विष्णुदै
वतं । ततो गोदानं । गावो मम मातरः सन्ति ॥ ति । तिलादिदानेषु हिरण्यं दक्षिणा । ह्यथकृविस्तारेण ह्यथक्रदानकाले नाम
भवेत् समुद्दितानां संकल्पः । अस्मात् तिलादीन्यष्टौ महादानानि नानादैवतानि गन्धाद्यर्चितानि सदक्षिणानि तत्तद्दा
नफलावाप्तये श्रीविष्णोः प्रीतये नानागोत्रेभ्यो ब्राह्मणेभ्यो नानानामभ्यो ददे संप्रददे । अथ वा संप्र[illegible]दानसमस्य
रूपी केशवं पुण्यरूपाहि भिस्ततः । प्राणीपातैस्तवैः पुष्पैर्ध्यानयोगेन पूजयेत् ॥ प्रायश्चित्ते धेनुदानं । मन्त्रः ॐ सर्वभू
तानामसि त्वं पापघ्नाशिनी पापारिणी वैतरिणी निमग्नानां समुद्धारक्षमोऽस्तु तां श्रीकृष्णस्मरणं । सति संभवे शक्त्या सा
निदानानि । तत तिलपात्रदानं । यथाशक्ति ताम्रपात्रे तिलान्निक्षिप्य सुवर्णं च । अद्येत्यादि जन्मप्रभृति मरणान्तं तत
तनानाविधपाप[illegible]शमनार्थं तिलपात्रदानमहं क० । विष्णुपादप्रक्षालनं । गन्धमाल्यादिपूजां यथाशक्ति
कृत्वा । मम जन्मप्रभृति मरणान्तं नानाविधपापप्रशमनार्थं तिलपात्रं सहिरण्यं अमुकगोत्राय अमुकश
र्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । दानप्रतिष्ठासिद्ध्यर्थं दक्षिणां । अथ तिलपात्रदानमन्त्राः । तिलाः पुण्याः पवित्राश्च

७ नाम ५ धेनुकें ५ नाम ७

तिलाः सर्वकराः स्मृताः । शुक्ला वा यदि वा कृष्णा विष्णुगोत्रसमुद्भवाः । पानि कानि च पापानि ब्रह्महत्यासमानि च । तिल-
पात्रप्रदानेन तानि नश्यन्तु सर्वदा । हर्षगोत्रसंभूताः कश्यपस्य तिलाः स्मृताः । तस्मादेषां प्रदानेन मम पापं व्यपोहतु । नमम-
नि विप्रहस्ते जलं क्षिपेत् । पुत्रादिस्तु अस्य पापं व्यपोहतु इति वदेत् । पक्षा । अथ मंत्रः । यो देवः पितृरूपेण हव्यकव्यभुगव्य-
यः । तिलपात्रप्रदानेन नमामि विष्णुः प्रसीदतु इति शान्त्रे तरं सोऽस्य विष्णुः इति पठेत् । एतन्मंत्रपदेन विष्णुः प्रीतिदे कृष्णलवे
तो स्त्रिद्धा ततो गंगादिपुण्यतीर्थे अश्वत्थसमीपे अथवा धात्री तुलसी शालिग्रामसमीपे वा एतेषां स्थाने गच्छन् गृहे वा
गोमयोपलिप्तायां भूमौ कुशोपर्युपविष्टः नरः दक्षिणशिरसं हरिहरि ता शिरसं बाः शायी ततो तुलसीमूर्ध्नि पुंड्रं गंगामृत्तिका गोपी-
चंदनादि मुखे शिरे कर्णे कंठे गोलोक धारयेत् । श्रीपरमेश्वरं स्मरन् पुत्रोऽङ्के धारितशिरा तिष्ठेत् । अथ घे सा अपकृ-
स्य स्वप्नतलया क्षिकामनपाशुएण स्त्रका हिपा रमेह करिष्ये । श्रोप्येवा । ईशावास्यमध्यायं संपूर्णं जपेत् । अथवा
वा श्रावयेत् । ईशावास्यमिति इं सर्वं अंतकाले सदा पठेत् । जस्यायैव परांस्यान्ते अमृतसंगा कृतिः । इति यजुर्विधानात्तान
त् । ततः उपनिषद्भागान् नमा श्रिव पुण्यसूक्तानि गी[illegible]ता लोत्राणि च सहस्रनामानि पठेत् शृणुयाद्वा । श्रोतुं संक-
ल्पयाशक्तो भाव पिता मम कर्णे लोऽस्य मामूलफलदानपे अश्रुकं श्रावयिष्ये इति संकल्पयेत् । श्रीरामादिस्मरणं कार्यं ।

प्राणोत्क्रमणसमयेऽक्रान्तयेनुतरानां वक्रान्तयेनुं दरिद्राय कुटुंबिने श्रोत्रियाय ब्राह्मणाय दद्यात्। अथ सा- देशका
ले स्नात्वा अमुकगोत्र अस्मत् अमुकशर्मणो मुमूर्षोः प्राणोत्क्रमणप्रतिबंधकजन्मजन्मान्तरकृतनिःशेषसकलपापक्षया
र्थं सुखप्राणोत्क्रमणार्थं यथाशक्त्यालंकृतामिमामुत्क्रान्तिधेनुं रुद्रदैवत्यां अमुकशर्मणे तुभ्यमहं संप्र०। अमुत्क्रान्तौ
प्रपन्नस्य मुक्तो उत्क्रान्तिविघ्नक्षये। तुभ्यमहं संप्रददे नाम्नी गां समुत्क्रान्तिसंज्ञिकां। इति मंत्रः। गवामंगे० इति मंत्रमुक्त्वा नम
मेति दद्यात्। पित्रादेरशक्तौ पुत्रादिर्दद्यात्। तत्र नममेति पदस्थाने पित्रादेरिति वदेद्विशेषः। धेन्वाभावे प्रत्याम्नाय
निष्क्रयं दद्यात्। अथ प्राणोत्क्रमणानन्तरं कर्माण्यपि पुत्राः कर्ता पत्यवर्जं नखलोमानि वापयेयुः कर्तव्यतिरिक्ता
पारदशमेऽह्नि वापनं यथाचारं कर्मुश्च दशमेऽह्नि मन्त्ररिमे नपत्न्याश्च पित्राद्येदशमेऽह्नि वापनं यथाचारं कार्यं। ततः कर्ता
वपनानन्तरं स्नात्वाहते वाससी परिधाय मृतस्य शरीरं प्रक्षालनेन। अहतवस्त्रपरिधानेन अन्तरीयमात्र वा। चंदनेन मृतदे
गप्रोक्षणं पुष्पैरलंकरणं। कुर्यादिति निर्णये प्रायश्चित्तं कर्तव्यं। कर्तापि पापमुक्तो भवति तद्वंशोऽपि स्वपापानुसारेणा प्रा
यश्चित्तं प्रकरणोक्तं प्रायश्चित्तं कृत्वा मृतस्यौर्ध्वदेहिकं कुर्यात्। विहितप्रायश्चित्तस्याकरणे त्वनन्यचरणमुद्दिश्य कृत्वा लोभादिनौर्ध्वदे
हिकं करोति तस्य सर्वं नोपतिष्ठते। अपि तु निष्फलं नरकप्राप्तिर्भवति। अतः प्रायश्चित्तं कृत्वैव सर्वमौर्ध्वदेहिकं कुर्यात्।

पश्येत तस्मात्मनश्च शुद्धिमकृत्वा लोभात्स्नानदाहादिकं करोति तत्सर्वं नोपतिष्ठते । स पापो निश्चये नरकगामी भ-
वति । अतः प्रायश्चित्तं कृत्वैव तत्सर्वमौर्ध्वदैहिकं कुर्यात् । अथ दुर्मरणनिमित्तं प्रायश्चित्तान्युच्यन्ते । शृङ्गी । दंष्ट्री नखी
। शस्त्रघात । सर्प । जले मग्न । कण्ठग्राह । विषभक्षण । अग्निदग्ध । विप्रमारित । आत्मघात । चाण्डालहस्तेमरण । चौ-
रमारित । शत्रुमारित । म्लेच्छादिहत । भ्रष्टशस्त्रमरण । वृक्षारोहणादि । वन्दिग्रहपाशमरण । विशूचिका । भूत-
शाकिन्यादिग्रहैर्हत । शकटादिहत । गजहत । पर्वतारोहणादि । विकलचित्तभ्रम । विद्युत्पात । पाषाणाहत । कुष्ठव्या-
धिमरण । महारोगे प्रपीडित । क्षयव्याधिमरण । पापान्नपोषित । मूत्रपुरीषमध्य अशौचमरण । अपस्माररोगादि
भगंदर । जलोदर । गंडमाला । पांडुरोगी । इत्यादिष्वनेकदुष्टमरणे कृच्छ्रं चान्द्रायणद्वयं धेन्वादिदानरूपप्रत्याम्ना-
यरूपेण प्रायश्चित्तं कृत्वा । अथवा पञ्चगव्यप्राजापत्यानुकृत्वा शतहोमसर्वांगवादिनम्यसामग्र्या प्रदानेन तत्तद्दानीमेव शु-
द्धिं संपाद्य और्ध्वदेहं कुर्यात् । एवमूर्ध्वोच्छिष्टाधोच्छिष्टोभयोच्छिष्टास्पृश्यस्पृष्टपञ्चदशास्पृश्यादिस्पर्शादिस्य मरणे दोषशा-
नुसारेण त्रीन् षड्वा द्वादश वा पञ्चगव्यप्राजापत्यान् विधानपूर्वकं कृत्वा तद्दानीमेव तत्सामग्र्या प्रदानेन धेनू दा-
दिकं कृत्वा शुद्धिं संपाद्य दाहादिकं कुर्यात् । तत्रैवं प्रयोगः । अमुकसगोत्रस्यामुकप्रेतस्य देहशुद्ध्यर्थं ~~[illegible]~~

मृतस्य सर्पदंष्ट्रमरणजनितपापनिवृत्त्यर्थं दाहाद्यौर्ध्वदेहिककर्मयोग्यताप्राप्त्यर्थं च पंचदशगानां प्राजापत्यानां प्रत्या-
म्नायप्रतिप्राजापत्यं दशदशाः साम्नायं ब्राह्मणभोजनानि अथवा आम्नायानि नित्यं वा दास्ये। नानागोत्रेभ्यो ब्राह्मणेभ्य
इति ब्राह्मणानभ्यनुज्ञाप्य हिरण्यजलमध्ये जलं क्षिपेत्। एकैकां वा गां अथवा प्रतिप्राजापत्यं स्वपुत्रगायत्रीजपं ब्रा-
ह्मणभोजनं यथाशक्ति वा। तीर्थयात्रापक्षेणवेति प्रयोगः। अथ द्वितीयप्रकारः। ततः कर्ता देशकालौ स्मृत्वा पित्रादेरू-
र्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टस्पृष्टास्पृष्टमरणरक्तजनितमरणपापप्रत्यवायपरिहारार्थं पंचदशद्वादशत्रीन्
वा कृच्छ्रान् यथाशक्ति प्रायश्चित्तममुकप्रत्याम्नायेन सह मृतं कर्तुं करिष्ये इति संकल्प्य तदेव द्रव्यादिना शक्तौ
मृतकार्यं कुर्यात्। कर्माण्यात्मशुद्धौ देशकालस्मरणं कृत्वा आत्मशुद्धिद्वारा पित्रादेरौर्ध्वदेहिकाधिकारसिध्यर्थं
शक्त्या एतावदेव कृच्छ्रं प्रायश्चित्तं करिष्ये इति तदेव मृतकार्यं वा कुर्यात्। किंचिद्दुर्मरणं जातं तदा मरणानंत-
रं चोर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टस्पृष्टास्पृष्टमरणं वा अन्यमरणं वा अमरणादिषु तत्सद्यो वा षड्द्वादशपंचद-
शवा कृच्छ्रान् प्रायश्चित्तं निमित्तानुसारेण ब्राह्मणवचनात् गृहीत्वा शक्तौ तदेव च प्रसाम्नायतया हिरण्यादि द-
त्वा शुद्धिं संपाद्य दहनादि कुर्युः। शक्त्या पुत्रादयः पित्रादेः पापविनाशार्थं नागशुद्धौ च सर्वप्रायश्चित्तं घनवत

राम०
९

संकल्पादक्षिणादिकुर्युः। एवं कर्त्राद्यधिकारार्थं मावेशकृत्यादिरुद्धरूपां शुद्धिमात्मनः संकल्पेन तद्दैवं वाक्या
ग्रायेन संपाद्य दक्षिणादिकुर्यात्। अस्य श्राद्धस्यैवं भवति सर्वं। अथ षट् पिंडाः। पत्रस्थाने भवेन्मृत्युस्तत्र श्राद्धं प्रक
ल्पयेत्। मृतस्थाने शवनाम्ना पिंडदानं। ततः श्राद्धकर्ता आचमनं प्राणायामं कृत्वा पवित्रहस्तः बद्धशिखः। मृतक
स्य दक्षिणपार्श्वे दक्षिणाभिमुखोपविश्य। संकल्प्य अद्येत्यादि० मासे पक्षे तिथौ अमुकनामन् एवंगुणविशिष्टा
यां पुण्यतिथौ। अपसव्यं अमुकगोत्रस्य अमुकप्रेतस्य दाहार्थं अकामादिपिंडप्रदानमहं करिष्ये। अवनेजनं। गोत्र
अमुकप्रेत शवनिमित्तं पिंडस्थाने अवनेजनं मद्दत्तं तवोपतिष्ठतां। दक्षिणाग्रं कुशास्तरणं। पिंडदानं। गोत्र अमु
कप्रेत उत्क्रान्तौ शवनिमित्तं एष पिंडो मद्दत्तस्तवोपतिष्ठतां। प्रत्यवनेजनं। गोत्र अमुकप्रेत पिंडप्रत्यवनेजनं मद्दत्तं
दह्यमानमनाथमि अंशामान्नं सजलं गोत्र प्रेत ते उपतिष्ठतां। दक्षिणासंकल्पः। दह्यमानानां लोहस्य सास्राय पम
नमो हिरण्यं दक्षिणां ते उपति०। अनेन पिंडदानेन प्रेतस्य सद्गतिः उत्तमलोकप्राप्तिश्च। पिंडोद्धरणं। अथानंतरं
बान्धवाः सजातीयाः ब्राह्मणादयः अनन्ताः पुरुषकेशाः। शवं प्रच्छाद्य इति मुखं घाक्षिणि रक्षमूर्ध्वमुखं। दाहदेशं प्र
ति नयेयुः। ततः यवपिष्टघृतकुशतिलमधूदकजलपात्राणि स्रुवस्रुपालाशपत्रहिरण्यशकलादि दाह

दो

१०

सामग्रीं गृहीत्वा शवसहितं गृहान्निष्क्रम्य द्वारदेशे पांथनाम्ना पिंडदानं कुर्यात। शवस्य भूमौ निर्धाय पिंडस्य लेउ
पलेपनं। तत्रावनेजनं। अमुकगोत्र अमुकप्रेत द्वारदेशे पांथनिमित्तं अवनेजनं मद्दत्तं॰ पिंडदानं। गोत्र प्रेत द्वार
देशे पांथनिमित्तं एष पिंडो मद्दत्तः॰ प्रत्यवनेजनं। माल्यान्नजलकुंभसंकल्पः। लोहनिष्क्रयदक्षिणासंकल्पः। अने
न पिंडदानेन प्रेतस्य सद्गतिः उत्तमलोकप्राप्तिः। पिंडोद्धरणं। ततो मृन्मयीस्थालीस्थलौकिकाग्निं गृहीत्वा पव
पित्र्यादि सर्वं गृहीत्वा श्मशानं गच्छेयुः। शवाग्न्योरंतरालेन गंतव्यं। अथ सर्वे बांधवाः अप्रावरणा मुक्तकेशाः
वृद्धपुरःसराः प्रेतमनुगच्छेयुः। पतिगृहे मृतस्य हिंसालक्षणेन नगरपश्चिमद्वारेण नेयः। क्षत्रियस्तूत्तरेण। वैश्यः पूर्वे
ण। शूद्रो दक्षिणेन। ततः यमसूक्तं वा जपन्त आपःश्मशानं गच्छेयुः। अपेताद्या यमसूक्तं। ततः ग्रामश्मशानयो
र्मध्ये अर्धपथे विश्रामे भूतनाम्ना पिंडदानं। गोत्र प्रेत विश्रामे भूतनिमित्तं अवनेजनं मद्दत्तं अवनेजनवत् पिंड
दानं। प्रत्यवने॰ माल्यान्नजलकुंभसंकल्पः। लोहदक्षिणा। पिंडोद्धरणं। दाहदेशस्तु ग्रामात् आग्नेय्यां नैर्ऋते वा
मध्यान्नेतः सर्वतो निम्नो अनावरणो बहुलोष्टधिष्ण्यतं देशं प्राप्य श्मशानसन्निधौ भूमौ शनैः शवस्य दक्षिण
शिरस्थापनं। ततश्चितास्थाने वायुनाम्ना पिंडदानं। गोत्र प्रेत चितास्थाने वायुनिमित्तं अवनेजनं म॰ अवनेजनवत् पिं

स

रा म॰
१०

उद्धनादि सर्वं पूर्ववत्। ततः सर्वाणि तीर्थानि मनसा ध्यात्वा शवस्य स्नपनं। पुत्रादीनामपि स्नानं। शवहस्ते साध
कनाग्रापिंडदाने। गोत्रप्रेत शवहस्ते साधकनिमित्तं अवनेजनं अवनेजनवत् पिंडदाने। प्रत्यवनेजनं। अन्यत्सर्वं पूर्व
वत्। ततः गृहद्देशोकंटकाग्रदी निसमूलासपाम्रेतु ग्रहहस्थलेउ एकेन सर्वत्र प्रोक्षणं। ततः दक्षिणाशिरं चिताका
ष्ठे क्षिपनुयात्। चित्रास्थाने पिंडं चितामध्ये प्रक्षेपः। एवं हस्ते पिंडं शवहस्ते निधानं। त्रयः पिंडा अलेप्रक्षेपः। तस्मिन्नुवि
तायां दक्षिणाशिरमुत्तानं प्रेतं निदध्यात्। घृतेनाभ्यंजनं। प्रेताच्छादितं वस्त्रं द्विधा कृत्वा एकेन खंडेन प्रेतशरीरमाच्छा
दयेत्। द्वितीयं तरं वश्मशानवासिनामर्थे भूमौ निरस्येत्। अमुखे हिरण्यं प्रक्षिप्य। उपरिकाष्ठपूरणं। शिरप्रदेशे भूमौ
निरस्येत्। मुखे हिरण्यं प्रक्षिप्य। उपरिकाष्ठपूरणं। शिरप्रदेशे भूमौ अग्न्याधानं। अत्रापसव्येन दक्षिणाभिमुखे णि
न च सर्वं कार्यं। ततस्तिलाहुतीः कुर्यात्। हाम्रपेन नमः। इति पूजनं। तस्मिन्नग्नौ घृतेन एकाहुतिः। पत्रपुटेन होमः। अत्र मंत्रः॥
अस्मात्त्वमधिजातोसि त्वदयं जायतां पुनः। असौ स्वर्गाय लोकाय स्वाहा। इदमग्नये न मम। मंत्रे असावित्यत्र प्रथमा
नं प्रेतनामग्रहणं। त्रिपामप्यस्यमेव यथानूहः। मुखे तूष्णीं घृताहुतिः १ ततः बकुलतणान्महीलास्त्रयोप्रतालस्प्र
प्रदक्षिणं परीत्य मंत्रद्वयेन मुखे अग्निदानं। कृत्वा सुकुंकरं कर्म जानता वाप्यजानता। मृत्युकालवशं प्राप्य नरं पञ्चत्व

११

श्म ४

मागतं । धर्माधर्मसमायुक्तं लोभमोहसमावृतं । दहेयं सर्वगात्राणि दिव्यान्लोकान्स गच्छतु ॥ ततः अग्निमुखो भूत्वा लौ
किकं शेषः । गाढं रोदनं कुर्वन्ति । ततोऽग्निस्थिते रादीपनं । दाहानंतरं गोत्रप्रेतस्य जलनितपीडोपशमनार्थं विना दाघोपश
मनार्थं इत्यनुदकांजलिस्तेऽपतिष्ठतां । तेनास्युपशमनं । तत्र श्मशानवासिदेवानां श्मशानभूमौ पिंडदानं । दक्षिणाभि
मुखः अवनेजनं । गोत्रप्रेतश्मशानभूमौ अवनेजनं मद्दत्तं । दक्षिणाग्रे कुशास्तरणं । पिंडदानं । गोत्रप्रेतश्मशानवासिदे
वानां श्मशानभूमौ एष पिंडो मद्दत्तः । प्रत्यवनेजनं । मातोन्त्र मिश्रअश्मामा अजलकुंभसंकल्पः । स्नानमाचमि अत्र
मात्रेसज लेकुं ममैकं गोत्रप्रेतापते ऽयं । स्नानमानां लोहनिष्कृपर्णी दक्षिणां मद्दत्तां तवोपतिष्ठतां । अनेन पिंडदा
नेन प्रेतस्य सद्गतिः उत्तमलोकप्राप्तिः । अप्रेतनकर्मपोष्यताप्राप्तिः पिंडस्य दकप्रक्षेपः । अतः परं चतुर्थेऽह्नि अस्थिसंच

धेह्नि

यनं कार्यं । अत्र यथावत्तनीपे । ततः श्मशानभूमौ जलपूरितघटस्थापनं । हस्ते पाषाणं दिवं गृहीत्वा अत्र प्रदक्षिणं विना
भूमिं कृत्वा नूतनं घटं स्फोटयेत् । घटस्फोटनमिश्रा धारा ततः । सव्यं कृत्वा पृष्ठतः अनवलोकयंतो कनिष्ठपूर्वं त्वानार्थं
न धाविंग छेयुः । तत्रोदकस्मनीपे गत्वा परिहितवस्त्रं प्रक्षाल्य तदेव परिधाय उत्तरदानादि जेपुत्र पंचस्थालकं वा । उदकं

गम॰ ११

करिष्यामहे इति मंत्रेण उदकं पा चेत्ता कुरुध्वं मा चैवं पुनरिति प्रतिवचनं । प्रसुक्ते पुत्राः स्वपः समानोदकाः स्वपयाइध्रमु

वीनावीतिनः सव्यपाणेरनामिकया न धादि स्पंअ लं तज्जीमपनो घापनः श्रोशुवद्यमिति दक्षिणाभिमुखा निमज्जंति

१९

दकं प्रविश्य एकवस्त्राः अशिखाः ओं अंगोद्धर्षणेन कुर्यात्। ततस्तीरमागत्य सावम्यः दक्षिणाग्रान् अपुण्यान् रुंञ्जून् कु
शान् हस्तयोः कृत्वा सतिलमुदकं पाणिभ्यामासाद्य। वाग्यतो दक्षिणाभिमुखाः पितृतीर्थेन भूमौ पाषाणे वा एकैक
मेव लिंगिति प्रोवानि निर्विचेयुः। गोत्रप्रेत एष गधांजलिस्ते उपतिष्ठतो। सर्वे पुनः स्नानं। आचमनं शिखां बध्वा उदकादु
त्तीर्य स्नानवस्त्रं निष्पीड्य परिधाय पश्चादनवलोकयंतो अधोमुखाः कनिष्ठानां अग्रे कृत्वा ग्रामं प्रत्यायांति। दि
वा मृते अस्तमयादूर्ध्वं ग्रामं प्रविशंति। रात्रौ मृते सूर्योदयादनंतरं। अथवा आसन्नानुत्तमात्तत्तनीमेव प्रविशंति।
रात्रौ मृतानां रात्रावेव दाहः। ततो गृहद्वारसमीपे आगत्य निंबपत्रं दंतैर्विदश्य आचम्य अग्निं स्पृष्ट्वा पादेन पाषाणमाक्र
म्य गृहं प्रविशंति। ग्यादरोदनं करोति। अथ पुत्रादीनां नियमाः। ब्रह्मचारिणः। अधःशायिनः। अधउपवेशिनः परस्प
रं असंस्पृष्टाः। दानाध्ययनवर्जिताः। मलिनादीनामधोमुखाः। सर्वभोगवर्जिताः। असंगवाह्लकेत्यसंमार्जनं वा कु
र्वतो न किंचन कर्म कुर्युः। न क्षारं लवणं रपेयुः। खटूरादीनाप्यपः। यावत् त्रिरात्रं एकरात्रं वा उपवसेयुः। अशक्तो एकान्नं व्रीहि
यवाद्यमितं हारभौंवर्णं मांसाद्यभूपपापसवर्जितं एकवारं कीला। लब्ध्वा वा दिनास्वपे दिवैवाश्नीयुः। नरा
त्रौ। भोजनकाले भोज्यात् त्याज्यात्। मुष्टिमात्रं पृथक् प्रेतस्य नाम गोत्र उच्चार्य प्रेतोद्देशेन भूमौ क्षिपेत्। त्रिरात्रपर्यंतं सपिं

त्रि

प

१२

३

डनां एते निपमा भवंति। इक्षूपा प्रथमाहि दशाहपर्यंतं कुर्युर्वै: सह भोजनं। महागुरुनिपाते द्वादशाद्य एते निप
माभवंति। एइक्षुपा प्रथम सप्तमी पंचम सप्तम नवम दिने पुत्रातिभि: सह भोजनं। एष्वेव दिनेषु सर्वेषु पिंडा: स्ना
नपूर्वकं प्रथमदिनप्रभृति जलिदानं कुर्यु:। पुत्रादिस्तु प्रतिदिनं आदशाहात् दशरात्रं प्रेतोपकारार्थं अहरहस्त्रिप
मखंडीपल्लालनं कुर्युः। ततो हे वताप तने नदीतीरे अमतीर्थे अरात्पे वापत्रे स्था भवति तत्र प्रेतस्य मूर्धो मिश्र सर्थे
पिंडदानं कुर्यु:। ज्येष्ठपुत्रस्सर्वांगच्छंति। कनिष्ठ पूर्वो अनपेक्षमाणा अयमस्यागच्छंति। अथमूर्धा स्तनपादूर्ध्वगात्रो
अंत शिरसि ही रोदकदानं। ततो आत्रिकाष्टिका पादि कारोदका एकस्मिन्न पक्के मन्मये पात्रे उदकं। द्वितीये ही रंच
रुलवाव तरेक भांडा आकाशे स्थापनं तत्र प्रयोग:। अद्येत्या॰ एवं॰ थ्यो॰ अपसव्यं दक्षिणाभिमुखः उपविश्य गोत्रस्य
अमुक प्रेतस्य आप्यायनार्थं तापोपशमनार्थं आकाशे मन्मये पात्रे हिरोदकपो न्निधानमहं करिष्ये। तत्र मंत्र:। श्म
शानानलदग्धोसि परित्यक्तोसि बांधवै:। इदं नीरमिदं क्षीरं अत्र स्नाहि इदं पिब। अमुकगोत्र अमुक प्रेत। अने
न जलेन स्नाहि गोत्रामुकप्रेत अत्र क्षीरं पिब। अनेन आकाशे मन्मये पात्रे क्षीरोदक संनिधानेन गोत्रस्य प्रेतस्य तापोप
शांति:। प्रेताप्यायनम स्त्विति भवंतो ब्रुवंतु। ततो गृहागमनं। एतत् क्षीरोदक संनिधानमेकाहं वा दिनत्रयं वा दशाहं

राम॰
१२

क्षी

धाधावत्सूतकं प्रत्यहं रात्रौ कर्म्मणं।रात्रौ वा त्रिरात्रशेषे वा॥इति दाहप्रकरणं॥अथाहिताग्नेर्मरणासमया
दारभ्य दाहांतं कर्म लिख्यते।तद्यथा।अत्र शुक्लपक्षे प्रायो होमानंतरं रात्रौ यजमानस्य मरणशंकायां तदै
वाग्निं विहृत्य प्रातर्होमः कार्यः।अत्र होमद्रव्याहरणानंतरं तस्मादपतात् प्राक् यजमानमरणे गार्हपत्ये
होमद्रव्यं प्रक्षिप्य दहेत्।अत्र पनादूर्ध्वं प्राग्धोमाद्दाहवनीयेन दहेत्।एवं कृते यदि प्रातःकालपर्यंतं जीवन्नितदा
स्वकाले पुनः प्रातर्होमो न भवत्येव।कृष्णपक्षे रात्रौ मृतिशंकाचेत् प्रातराहुतिं पृथग्घुत्वा तद्दिनारभ्यामावास्ये
ष्टिपर्यंतानां सायंप्रातर्होमानां तंत्रेणानुष्ठानं कुर्यात्।ततः पिंडपितृयज्ञवर्जितामावास्येष्टिं कुर्यात्।तत्र
होमेष्टिपश्वादौ अनुष्ठीयमाने अशक्यापत्नीयजमानकर्तृककर्मलोपेपि न दोषः।म कलेष्टि संपवे अग्न्य
संस्कृतस्य चतुर्गृहीतेन पुरोनुवाक्याभ्यां प्रधानदेवतानां यागानुष्ठानं।तस्मात्प्रसंगमेवेष्टिं धानपा
गे पूर्णाहुतिं जुहुयात्।अग्नये स्वाहा।अग्नीषोमाभ्यां स्वाहा।इंद्राय स्वाहेति मात्राप्यया जिनः अमात्राप्यपाजि

वा

ग

१३

13

स्तुग्रग्रये विश्वस्वेद्ध्वाग्निमामिति ।ऽ ततः सकलपशुशादिकर्मकार्यमिकलामंमवेप्रधानदेवतानामाज्याहु
तिः । एवं कृते यदि अमावास्यापर्यंतं जीवति तदा न प्रतिदिनं सायंप्रातर्होमः । अमावास्यायाम पराह्णे केवलं द
क्षिणाग्निमुद्धृत्य पिंडपितृयज्ञः कार्यः नाग्न्यन्वाधानं । न व्रतोपायनं । नामावास्येष्टिः । कृतत्वात्सकले ष्टौ कि यमा
णायां हविर्ग्रहणानंतरं प्रागग्न्यादेर्नात्मारणे हस्त विधानार्हपक्षे प्रक्षेपः । आज्याहुत्यादूर्ध्वमरणेऽग्न्याहवनीये द
हो हविषां । तत्र मंत्रः । पाप्मोग्रहीतानि ताम्नः स्वाहेति तो वेनाम्याहवनीये सर्वाहुतिं जुहुयात् हिताऽश्वलायनब्रा
ह्मणे । केचित्त्वस्य पक्षेपि यमाणास्या मावास्येष्टिमेव कुर्वंति । तत्पर्यंतं पक्षहोमः । एवमेवारब्धानां वायुमा
स्यादीनां समापनं । तत्रैवैश्वदेवपर्वणि कृतेऽश्वे न पर्वपर्यंतं समाप्यविधानेन यथाकालं पक्षहोमं पक्षांते इष्टिं
च कृत्वा पुनः पक्षहोमं पक्षांते इष्टिं पुनरप्येवं पुनरप्येवं वरुणप्रघासमकालपर्यंतं कृत्वा वरुणप्रघासाः कार्याः
ततो मासचतुष्टयमतेऽधिपक्षहोमपक्षांतेष्टीः कृत्वा साकमेधाख्यं पर्व कृत्वा ततः शुनासीरीयं कुर्यात् तास

हे

रा०म०

१३

पत्नैवसाकमेधैर्यजेतेतच्छुनासीर्यैनयजेतेति श्रुतेः। अत्रापिपत्नीहोमेच्छादेरसंभवेवरुणप्रघा
साघेकंतंचेणकुर्यात्। ताहशस्यापिसंभवेग्न्याज्यंसंस्कृत्यपरिस्तरणमभिधानेकृत्वाचतुर्गृहीतं
स्तुरोनुवाक्यायाज्याभ्यांसर्वाननुप्रधानयागान्कुर्यात्। तदसंभवेप्रतिदैवतममुष्मैस्वाहेतिपूर्णाहु
तिंजुहुयात्। अत्रैतत्रामरणेहवीर्वृद्धविषांप्रतिपत्तिः। एवमेवपशुसोमयागानामप्येतत्रामरणशंकायां
यथासंभवमारब्धस्यसमापनंकर्मशेषंपश्वलाभेतद्दैवत्यंपुरोडाशंश्राम्यामिक्षांवापूर्णाहुतिंवाकुर्या
त्। अत्रसमाप्तेकर्मणिमरणेजातेतदंतमेवकर्मभवतिसर्वत्र। ततोदुर्बलावस्थंयजमानंसंभावितमत्रि[illegible]
ष्टमरणंज्ञात्वागोमयेनगोमूत्रेणचतौयोदकेनकुशोदकेनवस्त्रापपिताशुद्धवाससीपरिधाप्यगो
मयेनोपलिप्तायांवेद्यांदक्षिणाग्रानदर्भान्नास्तीर्यबहुलांस्तिलान्विकीर्यचतत्रप्राक्शिरसमुदक्शिर

१४

संदक्षिणशिरसं वा भूमौ निवेशयेत्॥ तत्र विष्णुपूजनपूर्वकं वैतरणीपादिदानं। स्वयं दानाशक्तौ पु
त्रादिर्दत्वा तस्य श्रेयो दद्यात्। ततो गतप्राणं ज्ञात्वा पुत्रादिः स्नात्वा वपनं पुनः स्नानं शुद्धवाससी परि
धाय शिखां बद्ध्वा मृतस्य शरीरप्रक्षालनं अहतवस्त्रपरीधानं। उत्तरीयस्य च। चंदनेन सर्वांगप्रोक्ष
णं। पुष्पैरलंकरणं। दुर्मरणनिमित्तं प्रायश्चित्तं कर्त्तव्यं॥ ततउल्का छिद्रापणादिदाहं कुर्यात्। कृता
पसव्यः॥ अत्रापसव्येन दक्षिणाभिमुखेन च सर्वं कार्यं॥ आहवनीयदक्षिणाग्निस्थाने सकृत्सकृ
त्परिसमूहनादिसंस्कारपूर्वकं दाहार्थं संतापनाग्न्युत्पादनार्थं आहवनीयदक्षिणाग्नी विहरति। तत्र
वज्रोपग्रहेणाप्रैषः कार्यः। तिस्र एव स्थालीरेष्टवैइति प्रैषः॥ ततः संतापाग्न्युत्पादनार्थं गार्हपत्याह
वनीयदक्षिणाग्निषु तिस्रो मन्मयी स्थालीः शुष्कगोमयचूर्णपूर्णाः अधिश्रयति। तस्या वमस्य सेनोत्था

धिश्रपणां। तौ हि प्रतप्त्वा येवस्यासोः कृत्वा नीयेति। सर्वा ह्रस्याली सुविकृत करणं। अथ षट्पिंडाः। ततः मरणस्था
ने शवनाम्ना पिंडदाने। तत्रायं प्रकारः। आचमनं तत्सी पारणा नापप्रकुशोपग्रहः श्राव समीपे दक्षिणामुख
: उपविश्य अद्येत्यादि: अमु॰ गोत्रस्य प्रेतस्य दाहार्थं उक्रांतादि पिंडदानमहं करिष्ये। अवनेजनः गोत्रप्रे
त उक्रांतौ शवनाम पिंड स्थाने अवनेजनं महत्रं॰ दक्षिणाग्रे कुशास्तरणे पिंडदाने। गोत्र अमुक प्रेत उक्रां
तो शवनाम एष पिंडो मरः प्रसव ने॰ मापात्र मजलकुंभसंकल्पः [illegible]। लोहनिष्क्र
यदक्षि॰ सं॰क॰ अनेन पिंडदानेन। प्रेतस्य सद्गतिः उत्तम लोकप्राप्तिः पिंडोद्धरणं। एवं द्वारदेशे पांथनाम्ना
पिंडदाने। अवनेजनं पूर्ववत्। गोत्र प्रेत द्वारदेशे पांथनाम एष पिंडो प द्रव्यः प्रस॰ माष जल॰ लोहद॰ पिंडवि
विसर्जनं॰ ततो मन्त्र पीस्याली स्थापं वाग्निसद्वितं सर्वांतिय जपा जाणि ष ष दास हर्भा चतिसा चू घृतपव
पिष्ट सुद्धोदक जल पात्र पलाश पत्रपञ्च हस्ता जिनसमाहरणं शाकलानि समिध्वर्हि स्रुक्गोमय दत्ता
दिकाष्ठ्यामत्री निक्षिप्त द्रव्यं गृहीत्वा हारिद्रवस्त्रेण शवं प्रच्छादित मुखं पुरुकुशिरसर्वं मुखस्य हानिष्क्र

१५

15

मदाहं दहेशं अतिनपेपुः। ममार्नाग्निः श्रोताग्नयः शवाग्रे अमेन वा नेतव्याः। प्रेताग्निमध्ये नगं तत्यो। यमगा
थोगाय मानाय मस्तके जपेत् नङ्गे कश्चाङ्गुष्ठः। अहरहर्नीयमानो गामश्वं पुरुषं जगत्। वैवस्वतो न तृप्यति सु
रया इव दुर्मतिरिति यमगाथाः। ततः अपेतो यन्तु पणयो मस्तके। परे यिवांसमिति षोडशर्चं सूक्तं वक्तव्यानां
प्रति ...। ततः ग्रामश्मशानयोर्मध्ये अर्द्धपथे विश्रामो भूतनाम्ना पिंडदानं अवने· कुशास्तरः पिंडदानं प
सव· माघस्य· लोहं· पिंडविसर्जनं· श्मशाने गत्वा भूमौ शवस्य दक्षिणाशिरः स्थापनं। ततः चितास्थाने वायुना
म्नापिंडदानं· अन्यत्सर्वं पूर्ववत्। पिंडोद्धरणं सर्वाणि ... शवस्नापने शवहस्ते साधकनाम्ना
पिंडदानं। अन्यत्· पिंडोद्धरणं सर्वेषां आचमनं पुनः कुशोपस्तरणं चितास्थाने अग्न्यागारकरणं। सर्वे प्राचीनावीति
दक्षिणामुखः कुर्युः। ततः अपसव्यः गार्हपत्याहवनीयदक्षिणाग्निस्थानेषु समूह्य संस्कारार्थं कृत्वा गार्ह
पत्याहवनीययोरन्तराले आगारं ततो चितिं काष्ठैः कुर्यात्। ततः चितौ प्राग्ग्रीवं उत्तरलोमं कृष्णाजिनमास्तीर्य तत
स्मिन् कृष्णाजिने शिरस्स्नातं प्रेतं निदध्यात्। घृतेनाभ्यंजनं। ततः प्रेताच्छादितं वस्त्रं त्रिभिर्भागैः शिरःप्रभृति पादांगु
गार्हपत्यं दक्षिणाग्नौ ... स्थापनं। सव्यावसव्यौ ... ततः स ... स्थापनं। ईशान्यां ... ३

एम
१५

णीपर्यंतपात्रांतनवपर्यंतं आकृष्टिरं समा[illegible]य चतुर्थभागंतस्याच्छिताग्रमप्रानभ्रमोनिरस्येत। मुखे नासिकयोर
न्तोः कर्णयोश्चैकैकं हिरण्यशकलमस्यन्नेपः हिरण्यशकलानामभावे आज्यबिंदून्। अथ पात्रप्रतिपत्तिः
ननु प्राणाग्राराम्युक्तानां पात्राणां मध्ये नेसखेपाणौरिक्तं प्रागग्रामुपभृतं। हृदये प्रागग्रां ध्रुवांरिक्तां। मुखे
प्रागग्रामग्निहोत्रहवणीं दक्षिणनासिकायां वैकंकतस्रुवं प्रागग्रमुत्तानं। कर्णयोः प्राशित्रहरणे। शिर
सि रिक्तं प्रणीतापात्रं चमसमुत्तानं प्रागग्रं। कपालान्यपि विकल्पेन शिरसि। विकल्पेनास्तु। पार्श्वयोः स्फ्य
मेकं चैकं। द्वितीयं वरुणप्रघासिकं। प्रतिप्रस्थातुर्मेष्यर्थं यवग्रहणपात्रं पृथुकं। लौकिकमेवेतिके
चित्। एकं वेदिं द्विधा कृत्वा पार्श्वयोः खंडमासाद्येत। उदरे पृषदाज्यवतीं पिंडां प्रागग्रां। शिश्ने समीपे शम्यां प्रा
गग्रां। अंडयोः समीपे अरणी सुदृगग्रे। तत्समीपे आश्वो मुखमुलूखलमुसलं च। आज्यस्थालीम[illegible]उपवे धो
वेषषड्वत्रां। श्मश्रुनावदानतपुरोडाशपात्रीपिठरणे पात्रकूर्चं नमुखानि सर्वाणि पवनमात्राणि [illegible]र्वौम ऊ
ध्येसादयेत। [illegible]र्जपात्राणामपिच्छरणिस्वहितानामृत्विग्मध्ये सादयेत। दाहणासा या सिकानां चामतम्यानां

२

१६ 16

स्थालीकपालानां पात्राणाम् अश्ममयानां च दृषदादीनाम् अप्सु प्रक्षेपो वा। लोहमयानां वायव्ये वेलीकपर्दिका
कीलकादीनां ब्राह्मणाय प्रदानं। अप्सु प्रक्षेपो वा। ततो दक्षिणाग्निमुखः गार्हपत्ये आज्यं संस्कृत्य निरूप्याज्यं
गार्हपत्ये विश्रयणं। स्रुक्स्रुवं संमृज्य खादिरं स्रुवं जुहूं स्रुचं कुर्यात्। आज्यं स्रुवा सोत्पूयावेक्ष्य कांस्ये सकृद्गृहीत
ग्रहणं। उपरि समिंधं धारयन्। आहवनीये परिस्तीर्य समिधमाधाय अस्मात्त्वमधि मंत्रेणैकाहुतिं जु
होति। अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः। असौ स्वर्गाय लोकाय स्वाहा इदमग्नये प्रेताय ततो जुह्वां घृ
०
तेन प्रेतपितापुत्रस्य दक्षिणहस्ते। अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः। असौ स्वर्गाय लोकाय स्वा
हा इदमग्नये मा गच्छेत् माहवनीयाभिमुखं खादिरं स्रुवं सव्यनासिकायां उत्तानं। स्फ्यं दक्षिणहस्ते। पात्रविशेषादाज्य
स्थाल्यां ऊर्वोरंतरे वेद्यां प्रक्षेपः। अन्येषामप्सु प्रक्षेपो वा। चितोपरि कृष्णाजिनास्तरणं। तदुपरि दक्षिणाग्रे बर्हिः
छादनं ततः आहवनीयादालभ्य मंत्रपाठः। कृत्वाद्य दुष्करं कर्म ज्ञानताप्यज्ञानता। मृत्युकालवशं प्राप्य
०
नरं पंचत्वमागतं। धर्माधर्मसमायुक्तं लोभमोहसमावृतं। दहेयं सर्वगात्राणि दिव्यान्लोकान्स गच्छतु

१६

द्वानंतत्सलिलात्तीरेस्त्रीणांपुरजनं। तत्रमंत्रः। तंप्रतत्कर्म्मघोनेनलोकपरिपालकाउक्तसंस्कारकस्त
स्मादेनंस्वर्गमनतंनयततोग्निमिस्थितेराद्दीपनं। ततस्कंधे ... कुंभंकृत्वातेनप्रेतपाशप्रदेशात्आ
रभ्याचितिंपरितःअप्रदक्षिणंघटंदत्वाततउत्तराभिमुखोभूत्वालौकिकप्रेषःशान्तरेदनंकरोति। दाहा
नंतरंसर्वंअन्तग्निकवत्। इत्याहिताग्नेर्दाहविधिः। अथावसथ्याग्निकानांमरणसमयादारभ्यदाहांतंक
र्मलिख्यते। तत्रपुत्रःपहोमापहोमानेनंसररात्रौमरणाशंकायांआवसथ्याग्नौप्रातर्होमःकार्यः। एवंकृतेप
हिमातःकालपर्यंतंजीवतितत्सायंकालहोमोनभवतिवाकृतेसायप्रातरात्रौमृतिशंकायांप्रातराहुतिंकृत्वान
दिनाहारभ्यअमावास्यापर्यंतानांसायप्रातर्होमानांतत्रानुष्ठानंकार्यं। ततःपिंडपितृयज्ञवर्जितमावा
स्यप्रतिपदिनसंबंधिसकलपत्नाहिककर्मकार्यं। एवंकृतेयदिअमावास्यापर्यंतंजीवतितदाप्रतिपदिंत्ता
पंचातहोमाः अमावास्यायामपराह्णेपिंडपितृयज्ञःकार्यः। अस्मात्मकर्मणामरणेजातेतदंतमेवकर्मभ
वतिसर्वत्र। ततोदुर्बलावस्थयजमानंभाषितसन्निकृष्टमरणंज्ञात्वाततोगोमयेनगोमूत्रेणचपीठेदक

१७

नववस्त्रापवित्वा सुस्नात्वा मसी परिधाप्य गोमयेनोपलिप्तायां भूमौ दक्षिणाग्रान् दर्भानास्तीर्य वकुलं तिला
न्विकीर्य तत्र उदक्शिरसं दक्षिणाशिरसं वा निवेशयेत । तत्र विष्णुपञ्जरपूर्वकं वैतरणादिदाने । स्वपेहनाक्ष
क्षे पुत्रादिर्दद्यात तस्य श्रेयोदयात. ततउपनिषदादि पुण्यसूक्तानि श्रावयेत् । गतप्राणं ज्ञात्वा पुत्रादेः स्नानं
वपनं पुनः स्नानं मृतस्य शरीरस्य क्षालनं । अहतवस्त्रं परिधाप्य । उत्तरीयमप्याचावेष्टन पुष्पैरलंकरणं । उमर

17

णनिमित्ते प्रायश्चित्ते कर्तव्ये । अथ षट्पिंडाः । मृतस्थाने शवनाम्ना पिंडदाने सर्ववत । द्वारदेशे पान्थनाम्ना पिं
डदाने सर्ववत । ततश्चावसथ्याग्निं सहितश्चरणिप्रमुखाणि सर्वाणि यज्ञपात्राणि स्पर्शकृष्णाजिनकुशाघृत

त्रिनि

तिलहिरण्यशकलादीन् गृहीत्वा शवसहितं गृहान्निष्क्रम्य ममस्कंजयंतः अरण्यश्मशाने गच्छेयुः
अपेतावीतापसर्पतः ग्रामश्मशानयोर्मध्ये विश्रांतौ भूतनाम्ना पिंडदानं । ततः श्मशानभूमौ शवस्य
स्थापने । ततश्चितास्थाने वा पुनर्नाम्ना पिंडदाने । सर्ववत । ततः सर्वाणि तीर्थानि मनसा ध्यात्वा शवस्य स्ना
पनं । ततः शवहस्ते साधकनाम्ना पिंडः ततः दक्षिणशिरं चितायां काष्ठैश्चनुपात । पिंडप्रतिपत्ति प्राग्वत । ततः

पादं०
१७

चितौ दक्षिणाग्रीवमुत्तरलोमं कृष्णाजिनमास्तीर्य तस्मिन्नुदक्शिरसमुत्तानं प्रेतं निदध्यात्। आज्येना
भ्यञ्जने। प्रेताच्छादितवस्त्रविनियोगं प्रागुक्तं। मुखे हिरण्यशकलं प्रक्षिप्य। अथ पात्रप्रतिपत्तिः। शिरसि
प्रणीतापात्रमग्रौ स्रुवं द्विधा कृत्वा पार्श्वयोः एकैकं खण्डमासादयेत्। ऊर्वोः समीपे अरणी मुसलाग्रे। तत्स
मीपे अपो मुखं उलूखलमुसलं च। उपवेषं वक्षसि दक्षिणहस्ते प्रागग्रं। सव्यहस्ते प्रोक्षणीपात्रं प्रागग्रं। लोहम
यपात्रं पूर्ववत्। ततः शिरःप्रदेशे धूमो अग्न्यागारकरणं। तत्रापसव्ये दक्षिणामुखः सकृत्भूसंस्कारः।
आवसथ्याग्निस्थापनं। आज्यसंस्कारः निरूप्याज्यमधिश्रित्य पर्यग्निकुर्यात् स्रुवं प्रतप्य कुशैः संमृज्योदके
नाभ्युक्ष्य पुनः प्रतप्य निदध्यात्। आज्यमुद्वास्य कुशेनोत्पूयावेक्ष्य सव्यहस्ते कुशानगृहीत्वा दक्षिणहस्ते स्रुवे
णाज्यं गृहीत्वा सव्यं जान्वाच्य वामहस्तेन हृदयं स्पृष्ट्वा एकाहुतिहोमः। मंत्रेण अस्मात्त्वमधिजातोऽसि त्वदयं जा
यतां पुनः। अमुकप्रेताय स्वर्गाय लोकाय स्वाहा। त्रिपदामंत्रस्य [illegible] ऋषिः। इदं स्वर्गाय लोकाय इति शव
मुखे त्यागः। दक्षिणनासिकायां स्रुवं दक्षिणाग्रं उत्तानं निधाय। उपरि काष्ठस्तरणं। तदुपरि दक्षिणाग्रै

६

वर्हिराच्छादनं॥ ततस्तिलास्तैर्विकिरेत्। त्वं भूतकृज्जगद्योनेस्त्वं लोकपरिपालकः। उक्तः संस्कारकस्तस्मात
एनं स्वर्गं नयतेनघ॥ अतःपरं वहुलक्षणां प्रलिङ्गृहीत्वा अग्नेः प्रज्वालस्य अप्रदक्षिणं परीत्य मंत्रद्वयेन मुखे अग्नि
दानं कुर्वीत। कृत्वा तु दुष्करं कर्म जानता वाप्यजानता। मृत्युकालवशं ज्ञात्वा नरं पंचत्वमागतं। धर्माधर्म
समायुक्तं लोभमोहसमावृतं। दहेयं सर्वगात्राणि दिव्यान् लोकान् स गच्छतु॥ इति अग्निदानं। ततउत्तरा
भिमुख उपविश्य लौकिकेष्वः गाढरोदनं आर्द्र[illegible]तथा हे हे हे इत्यादौ आक्रुतीं ततः दाहानंतरं दाहभूमौ
श्मशानवासिदेवानां पिंडदानं। इत्यावसथ्याग्निमेवंविधिर्दाहविधिः। अग्नेः सर्वदेवत्वतः। आहिताग्नेः शि
ष्यैःश्मार्तं पात्रप्रतिपत्तिकृ[illegible]स्या श्रौतपात्रप्रतिपत्तिर्भवतीति कर्मप्रदीपे शाखायनवचनो
मस्ति तदपि युक्ततरं। इति श्रौतस्मार्ताग्नयो निरग्निकस्य मरणासन्नप्रायाहारस्य दाहान्तपर्यंतं कर्म समाप्तिः
अथानंतरं उच्छिन्नाग्नेर्गृहार्थमृतधाने लिख्यते। तत्रापसव्येन दक्षिणाभिमुखेन च सर्वं कार्यं॥ आच
मनप्राणायामः। अद्येत्यादि एवंगुणविशिष्टायां तुण्यतिथौ अपसव्यं गोत्रस्य अमुकस्य उच्छिन्ना

कृत्वा पश्चा

मध्ये

एम

ग्नेर्हीहार्यमन्वाधानेकरिष्ये। अरण्योरुपरि दक्षिणं प्रेतपाणिं कृत्वा अयंतइतिसमारोपमंत्रं उच्चादिर्जपे

त्। अथ प्रेते योनिर्हृत्विः रयिमुखस्वयसंस्कारः गार्हपत्यस्य पश्चात्पेस्याग्निरयोजुहुतो इति मंत्रेण मथितां

गार्हपत्यस्य स्थापनं। पेस्याग्नेयो जुहुतोमासकामानसंकल्पयंतेयजमानमांसंजायंतु तेह दिवि बेसाः दनाय तेस्व

र्गलोकमिमे प्रेत नयंतु इति मंथनमंत्रः गार्हपत्यमाहवनीय दक्षिणाग्नीः द्वरेण। गार्हपत्ये आज्यसंस्कृ

तस्रुचि ह्वा दृशाग्रहीतं गृहीत्वा समिस्तर्वकमाहवनीये तत्संौडुत्वाउपौधिश्चयणादिहाहं कुर्यात। उच्छित्रा

ग्नेः अरणिसमारोपेण वं। अरण्योरभावेवान्येअरणी आनीयअरण्योरुपरि दक्षिणं प्रेतपाणिं कृत्वा अयंत

इतिसमारोपमंत्रं उच्चादिर्जपेत्। पेस्याग्नय इति मंत्रेणाग्निं मंथनं। [illegible] स्थापनं। आहवनीय दक्षिणाग्नी

द्वरेण। तिस्रः पवस्त्या लीरै ष्टवेइ तिमेषः तत्त उपौधि अपणादिहाहं कुर्यात। समग्निहोत्री णांमन्वाधानं। अथ

स्मार्तसमन्वाधानं। एवं वस्त्रकसः। खरसंस्कारः। समारोपमंत्र मंथनमंत्रादिपूर्ववत। मथित्वा स्थापनं। आज्यसं

स्कृत्य स्रुवेण स्रुचि द्वादशग्रहीतं गृहीत्वा उपरिसमिस्तर्वकं जुहोति तत्र मंत्रः उपावरोह जातवेदाः इमं प्रेते

ग्रहे १५

स्वर्गाय लोकाय न येनाहुतिं वा समनुपश्यत्स्वाहा। अग्नये इदं न मम। इति आपस्तंबशाखीयमंत्रः। इति श्रौताग्निमाधा
नं प्रदि विच्छिन्नाग्निस्तर्हि पत्नीविच्छेदस्तत्कालगणनया अग्निविच्छेदप्रायश्चित्तं तदैव कुर्यात्। संकल्पे द्वा
तत्र नागोलिखाद्‌ग्निनाशे मासद्वये कार्यं मासचतुष्टये तिकृच्छ्रः। षण्मासे अर्धं चान्द्रिकं। संवत्सरादूर्ध्वं त्रै
मासिकं। आलस्यादिनाग्निनाशे द्वादशाहातिक्रमे त्र्यहमुपवासः। मासातिक्रमे द्वादशाहमुपवासः।
संवत्सरातिक्रमे मासोपवासः। पयोभक्षणं वा। प्रमा [illegible] शिरात्रिरात्रं [illegible] संवत्सरात्दाद
ग्निनाशे आत्रिरात्राद्वादशाल्लघुप्राणायामः। आ ४ उ हाच्चतुर्विंशतिः। आ द्वादशाहात् पंचाशत। आविं
शत्याहाच्छतं। आमासाहुपवासः। आ षष्टिरात्रात् त्रिरात्रं। संवत्सरात्कार्यं। अतः परं प्रत्स कृच्छ्रार्धं संवत्सरो
र्ध्वमग्निनाशे चान्द्रं। द्विवर्षनाशे चान्द्रं सोमपानेन चान्द्रद्वयं वा। त्रिवर्षनाशे कृच्छ्राब्दं। गोदानेन चेतराद्दिः। अत्र
प्रत्याम्नायाः कल्प्याः। यावत्कालविच्छेदस्तावदाहुतिपरिमितं होमद्रव्यं च गृह्णीयात्। ततः प्राणायामो मंत्रकः। ए
वं सर्वप्रेतकृत्ये सर्वत्रैतत्कृत्यं प्राचीनावीतिना कार्यं दक्षिणापवर्गं च। अथ सर्वोदाहादिनिर्णयो देवज्ञानी

मारणे चौवाराशेषे वाऽप्रियंपते चेद्दिना तपः स्याहं कृत्वा पथाम्नायं द्वौ पिंडौ निर्वपेत्तु ततः ऽनिगमः । संध्यायां वा त
स्याराज्चौदाहः पाथेयकर्म च । नवश्राद्धं च नेच्छुर्पातकृते तेनिः फलं तत्र श्रजेत । रात्रिमृतस्य रात्रावेव दाहः । वपने
तु प्रभातः । तथा च स्मृतिसंग्रहे । रात्रौ दग्ध्वा तु पिंडांते कृत्वा वपनवर्जितं । वपनं नेष्यते रात्रौ श्वस्तनी वपनक्रि
या । निगमवचनं दिनमृतस्याः लस्माद्दिनाद्रात्रिदाहनिषेधार्थं तथा शावं रात्र्युषिते चेन्नीनकृच्छ्रान्सलात
हे तस्तुत इति । स्मृतिरत्नावल्यां । दशाहांत दर्शपाते भविष्यपुराणे । प्रवृत्ताशौचे तत्र स्यादि दर्शप्रपद्यते । समा
प्यवोदकं पिंडान् स्नात्वा समाचरेत । मातापितृविषये तु गोभिलः । अंत दशाहे दर्शश्चेत तत्र सर्वं समापयेत
समाप्यवोदकं पिंडश्च पावदशौचं दघात पिंडं तिलाञ्जली इषित्रोरिसेकशेषः पत्तु गालवः पित्रो राशौ
र्थं प्रायश्चित्तमहं करिष्ये। प्रायश्चित्तारंभ विष्णोः पूजनं। प्रायश्चित्तांगे वैष्णव श्राद्धं। गो मिथुन संकल्पः। वपनं दशविधि
स्नानं। शुद्धवस्त्रपरिधानं तिलकं। उपग्रहः। अग्निं तिष्ठौ। प्रायश्चित्तांगं व्याहृति होममहं करिष्ये। स्थंडिले भूसंस्कारः
अग्नि स्थापनं। आज्यसंस्कारः। भूः स्वाहा। इदं॰ भुवः स्वाहा। इदं॰ ॐ स्वः स्वाहा। ॐ भूर्भुवः स्वः स्वा॰ इदं प्रजापतये॰।
एवं सप्तवारं आहुतिः २१। ततः यथाशक्ति प्राजापत्य संकल्पः। मुखावलोकनं। सूर्यावेक्षणं वा। प्रायश्चित्तधेनु
दानं। पंच ब्राह्मण भोजन संकल्पः। प्रायश्चित्तं परिपूर्णता॥ अथ नारायणबलिः। अद्येत्यादि अपसव्यं गोत्रस्य अ
मुकमृतस्य दुर्मरण दोषनिवृत्यर्थं नारायणबलि पूर्वकं पुत्रलकविधिकर्माहं करिष्ये। सव्यं। पंचकलश स्थापनां दि
पंचरत्न श्राद्धांत पर्यंतं यथोक्त नारायणबलिकार्यः॥ नारायणबलिकर्मपरिपूर्णता॥ अनेन नारायणबली कृतेन अ
पसव्यं। गोत्रस्य प्रेतस्य दुर्मरणनिवृत्तिः अग्रे पलाश प्रकृति दाहविधिकर्मयोग्यता प्राप्तिः। सव्यं। आचमनं। स्नानं
शुद्धवस्त्रपरिधानं कुशोपग्रहः प्राणायामः। देवागातुविद इति कृष्णाजिनमास्तीर्य। तदुपरि उदक् शिरसं पुत्तलं
निधाय। अक्रन्कर्म इति मंत्रेण। सद्योजाते ति सर्वांगं प्रकल्पयेत्। पुरुषसूक्तेन अभिमंत्रयेत्॥ ततः षष्ठ्यधिक

शातत्रयपालाशवृंतानि सर्वांगे न्यसेत्। आयुष्यं वर्चस्यमिति शिरसि चत्वारिंशत्। ४०। वायुष्ट्वा पचतेति ग्रीवायां दश। १० सहस्रस्य प्रमासीति मंत्रेण स्कंधयोर्विंशतिः। २०। नमस्ते रुद्र मन्यव इति बाह्वोः शतमेकं। १००। देवस्य त्वेति सर्वासु करांगुलीषु १०। नवो नवः क्रिमि केन्य इति हृदये। २०। इंद्रस्य क्रोडोसि इति जठरे विंशतिः २०। स्त्रीणां वहिरिति कट्यां दश १०। स्त्रीविषये भगप्रणेतेतीति मंत्रेण भगस्थाने च विंशतिः २०। देवीरापो अपान्नपादिति शिश्ने दश। १०। एवेदिंद्रमिति वृषणे दश १०। अंतरा मित्रावरुणा इति ऊर्वोः प्रत्येकं पंचाशत् १००। सं देवस्य त्वेति सर्वासु पादांगुलीषु दश। १०। एवं षष्ट्यधिकशतत्रयमिते पूर्णे शवे शरीरं निर्माय ऊर्णासूत्रेण बध्वा यद्धेनयद्धेति मंत्रेण जलालोडितयवपिष्टेनानुलिंपेत्। लोमानि प्रयतीति मंत्रेण मांसस्थाने माषपिंडं घृतवतीमंत्रेण घृतेनाभ्यंजनं। मूर्धानं दिवो इति शिरसि नालिकेरं। ऋतं वै गायत्रेति कपालस्थाने तुंबिकां न्यसेत्। आत्मन्नुपस्थेति केशस्थाने शूकरकेशाः। विश्वतश्चक्षुरिति नेत्रे कपर्दिकाद्वे अश्विन्यां च हस्तुरिति कनीनिकास्थाने गुंजाद्वे। आनो निपुद्भिरिति नासिकास्थाने कार्पासः। आणदा इति वसास्थाने कर्पूरः। इंद्रस्य रूपमृषभो इति कर्णस्थाने शुक्तिकाद्वे। मुख ब्रह्मसदस्पत इति जिह्वास्थाने ताडपत्रं। परिव्राजपतिरिति मुखे पंचरत्नानि। नाभ्या आसीदमिति दंतस्थाने दाडिमबीजानि। ३२। एषस्य वाजीति ग्रीवायां सूत्रवेष्टनं। इंद्र सुत्रा

५७

57

फलेर
नोबीज
पानोस
नो

२ कमले

माइति हृदये हरितालकं। दैव्यावध्वर्यू इतिमेत्रेण गात्रेमनःशिलां। त्वातारमिति धातुस्थाने गंधकं। लोमभ्य इति रो
मस्थाने ऊर्णां। नाभिर्मे इतिनाभिस्थाने कंतुफलं। संधये जारमिति संधिस्थाने लाक्षारसः। सर्वसंधिषु। अग्निः ८ हृदये इति
कालजस्थाने मांजिष्ठा। इमं ८ स्तनमिति स्तनयो जंबीरफलं द्वयं। नमः शुवः स्व इति ललाटे अभ्रकं। पुनः ८ सुफला इति नखस्था
ने शुक्ताः २० ऋषभयः समवदं तइति सर्वांगे सर्वौषधी। श्रोत्राणि स्थाली इति आंत्रस्थाने कमलगट्टा। प्रजापतिश्चरति मेत्रे
ण शिश्ने गंजनं। स्त्री विषययो निस्थाने सरस्वती योन्यां इति अश्वत्थपत्रं। अग्ने जीनित्रमिति वृषलस्थाने इंतानकद्वयं।
आविर्मे रेतं वो इति वीर्यस्थाने पारदं। पृष्ठीर्मे इति हारिद्र वस्त्राच्छादनं। शिरसि कूष्मांडी पट्ट वस्त्रं ?। यामग्ने अंगिरसपुरीषे
पित्तले गंधद्वारामिति गुह्ये टंकणक्षारं। अश्वक्रांते इति गुदे मलिनकारे तो मूत्रमिति मूत्रस्थाने गोमूत्रं। अग्निर्हत्राणि
इति जंघायां मूलकद्वयं। बाहू मे बलमिति बाहुभ्यां कदली दंडं। त्रीणि पदा इति नलिकाभ्यां इक्षुदंड खंड २ एतावानस्येति
~~चरणावानस्येति चरणयो [illegible]~~ चरणांनं तुलां [illegible]। मधुवातेति रुधिरस्थाने मधु। यज्जाग्रतेति स्कंधे दंडनिधा
यातेजः पद्मनामिति तालुदेशे काचं। पुनंतु मे इति गुल्फयोः पूगीफलयोः। जिह्वा मे इति पादांगुलीषु उत्तमा। १०। यो देवेभ्य इति
पादपृष्ठे आम्रफलद्वयं। आशुः शिशान इति घुटिकाभ्यां बीजीफलद्वयं। इमं जीवेभ्य इति जीवस्थाने हेमाद्रुरुणः आविनाश

५७

११

वा।नो

तिपित्तस्थानेपिप्पली। वायोर्येतेइतिवातस्थानेऽशिरादधिक्राव्णाइतिश्लेष्मस्थानेदधि। तूली कुंकुमेनप्रोक्षणं। घृतंघृते
तिघृतेनस्त्रिःप्रोक्ष्य। अथपंचगव्येनस्नपनं। गायत्र्याचैवगोमूत्रं। गंधद्वारेतिगोमयं। आप्यायस्वेतिक्षीरं। दधिक्राव्णो
तिवैदधि। तेजोसिशुक्रमित्याज्यं। अथपंचामृतेनस्नपनं। पयःपृथिव्यामित्यादिश्वेतवस्त्रेणवेष्टनं। चंदनेनसर्वांगप्रोक्ष
णं। तुलसीमाला। दधिमधुलेपः। गुग्गुलेनधूपः। दीपः। पुनर्मनइतिमंत्रेणप्राणावेशनं। शिरोमेत्यनुवाकेनसर्वांगेषुन्नि
योजयेत्। शिरप्रदेशेसजलघटस्थापनं। तूष्णींफलमुद्रापनप्रक्षेपः। अथैतोध्यायेनकलशाभिमंत्रणं। इमंमेवरुणमंत्रेणवा
रुणआवाहनं। कलशोदकेनपुत्तलकस्याभिषेकः। अग्निमीलेऽइषेत्वा। अग्नआयाहि। शन्नोदेवीः। कलशोदकेनवा
चैतेभ्युधामीतिशरीरावयवप्रोक्षणं। मनस्तआप्यायतामितिआप्यायनंकुर्यात्। यास्तेसप्तर्षीतिमंत्रेणनामगोत्रंप्रतिष्ठाप
येत्। अथगर्भाधानादिसंस्काराः। अग्निर्ऋषीमंत्रेणअमुकस्यगर्भाधानंपरिकल्पयामि। वयंसोमेतिपुंसवनं। स्वस्ति
नइतिसीमंतः। जातरूपइतिजातकर्म। अग्नयेगायत्रायेतिनामकर्म। तच्चक्षुरितिसूर्यावेक्षणं। अन्नपतइत्यन्नप्राश
नं। शिवोनामेतिचूडाकरणं। भद्रंकर्णेभिरितिकर्णवेधः। ब्रह्मजज्ञानमितिव्रतबंधः। वस्त्रपरिधानं। यज्ञोपवीतमितिय
ज्ञोपवीतपरिधानं। आब्रह्मन्नितिव्रतविसर्गः। ध्रुवासीतिविवाहः। प्रजापतिश्चरतिगर्भेचतुर्थीकर्म। एवंयथोक्तस्त्रीपुंस
षपुरुषंकृत्वाततोदुर्मरणनिमित्तंयथाशक्तिप्राजापत्यसंकल्पः। आतुरवैष्णवंश्राद्धं। वैतरण्यादिदानां अष्टौमहादानानि

तिलपात्रं। घृतपात्रं। यथाशक्त्या अन्यानि दानानि। ततः परं नाभौ स्वल्पमात्रदीपस्थापनं। ईशावास्यमिति ब्रह्मविद्यां श्राव
येत्। दीपशमनसमये नूजसीति लोकान् हित्वा असि यमो इति मंत्रेण पुत्रलकोपरि प्रक्षिपेत्। रामलक्ष्मणस्मरणं। अत्र पुत्र
कर्त्तृ चेद् वपनं कार्यं स्नानं॥ अथ पथि पिंडः। आचमनं। प्राणा। अद्येत्यादि तिथौ अपसव्यं गोत्रस्य प्रेतस्य दाहार्थं उत्क्रान्त्या
दि पिंडदानमहं करिष्ये। अवनेजनं। गोत्र प्रेत अवनेजनं। मद्दत्तं पंचपिंडस्थाने अवनेजनं। पंचकुशानास्तीर्य। पिंडदाने
। गोत्र प्रेत उत्क्रान्तिनिमित्तं एष पिंडो मद्दत्तः। द्वारदेशे पाथनिमित्तं। विश्रान्तौ नूतं। चिता स्थाने वायु। शवहस्ते साधकनि
मित्तं प्रत्यवने। माषमिश्र आमान्नसंकल्पः। लोहनिष्क्रयणी दक्षिणा। पिंड विसर्गः। चतुर्थ पिंडं चितामध्ये प्रक्षिपेत्। पंच
मं शवहस्ते निदध्यात्। त्रीन् पिंडान् भुप्रक्षिपेत्। मृतकं दक्षिणाशिरसं चितायां न्यसेत्। घृतेनाभ्यज्य उपरिकाष्ठ
स्तरणं। शिरप्रदेशे भूमौ अग्निस्थापनं। आज्यसंस्कारः। अस्मात्त्वमधि मितिमंत्रेणैकाहुतिः। तूष्णीं मुखे आहुतिः। अग्निगृ
हीत्वा अप्रदक्षिणं परीत्य मुखे दानं। गाढं रोदनं। दाहानंतरं उदके नाग्निशमनं। दाहभूमौ पिंडदानं। गोत्र प्रेत अवने
जनं। पिंडदानं गोत्र प्रेत श्मशानवासि देवानां एष पिंडो। प्रत्य। माषमिश्र आमान्नसंकल्पः। लोहदक्षिणा। पिंडोद्धरणं॥
अथ अस्थिसंचयनं। पूर्ववत् सर्वो दाघांजलिः। पलाशवृंतानां वे कुशैः प्रतिकृतिं कुर्यात्। इति पुत्तलकविधिः। अथ सहग
मनविधिः। पतिं गते कंठप्राणं दृष्ट्वा चैव पतिव्रता। संकल्पं चात्मनः कुर्याद् इदं वचनमब्रवीत्। दैवैः संपादितो मह्यं पति
स्त्वं सर्वदैवतः। त्वया सहगमिष्यामि मन्नीवं चान्यजन्मनि। इति संकल्प्य ततः सती कृतस्नाना स्वशक्त्या दानपु

१ पुष्पादिकैलाकुसुमांजनं स्वकन्तुकुराद्यैः स्वशरीरमलंकृत्य तत्र सर्वं समन्त्र चर्यस्तु वासिनी चतुष्टयं ॥१

[illegible] अमुकसुमासिः फलपावसध्न तं मधुमिश्रं मो
क्षदीप्तदमावेदुरार्घ ॥ दुग्धाभावे जलेनाप्राशनं मंत्रेणवाश्वनुष्टुप्॥ वेध्यमम्याघंनकृता पितृभ्यः प्रातः म त्वा वियोगो नमः प्रास्तु
चान्या ॥ वेध्यात्वमेकं नकदा तती यमम दुर्भगत्वं नकदा चतुर्थी ॥ नोकलवस्त्राभरणैः स्रज ध्वसंनो ष्वनाग कुंकुम
गंधधूपैः ॥ वंधून्स्वपत्नान्स्मयेत स्वकीयान्विसृजित स्याभरणैः सहधी ॥ तासू नी स्वगृहं कुंकुमा दातेः
कृत्वा आशिषमि विवर्ड्येत ॥ तत स्ती र्थं गत्वा ॥ ततीशौचादिकं कृत्वा ॥ हस्तौ पादौ प्रक्षाल्या वम्य अर्घ्यादिश्रये
गः एवं ग्र्यथौ ॥ मत्ती स्त स्नगमनार्थं स्नानमहं करिष्ये ॥ स्ना नानंतरं कुंकुमवस्त्र परिधाने ॥ अ अ क्रांतधेनुदाने
॥ सुखेन प्रालोक्र मणार्थं इमां उक्रांत धेनुं सं ज्ञिकां गोश्र स्य दं श्र पवातत्स त्योपकल्पितं दक्षं ब्रा लगाय्या
हं ददे ॥ दानप्रतिष्ठा ॥ सिध्यर्थं हिरण्यं दक्षिणां ॥ अन्यानि दानानि देयानि तिनंकुंकुमां जनस्त्रजं विभूषिता
नि विष्णुध्यायन्चिताप्तमीपमागम्य पिंडोन्नृदद्यात् ॥ स्वहस्ते नवाप्रनिनि धिनावा ॥ प्रेवितोक्रांतनि मित्तं अमु
कगोत्रायै महंपर लोकगमनाय राय पिंडोपेउपतिष्ठतां ॥ प्रातिनिधिको वा ॥ अमुकगोत्रायै अमुकदेविनायेन
स्वंभाविन्योक्रांत निमित्ते एष पिंड स्ते उपतिष्ठतु ॥ एवं निमित्तस्थाने षुदेयं ॥ ततः स्त्र्यर्घः ॥ एषउं येमपादके

मि

५९

सूर्यसाक्षीतदश्नतः ॥ प्रसादं कुरु मे देव गृहाणार्घं नमोस्तु ते ॥ अथ सूर्यस्तुतिः त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वं
प्रजापतिः ॥ त्वं सूर्यो विवस्वत्त्व चक्षुश्चैव परमात्मा त्वमेव हि ॥ त्वमेव शरणं विष्णो शरणं तु पतिर्मम ॥ स्वर्गे वा नर
के त्वं हि पत्रयत्र गमिष्यति ॥ तत्र तत्र त्वं हं दृष्टे त्वं गमिष्यामि मा शुच ॥ ब्रह्महत्यादिभिः पापैस्त्वं मोक्षसि प
मात्मवान ॥ अहं ब्रह्मा यथा रुद्रो विष्णुः अहं वै सूर्य दिक्पतिः ॥ अथ लोकान् विशापपते ॥ आदित्यं च शिवं वि
द्यो न न्नश्चघो भूमि देह स्वस्तिनमश्च ॥ अहमाराति श्वउमेचसंध्येध में ह्रिष्णानाभिनरस्य वृत्तिं ॥ अनेन
सर्वे मम साहसे न तु च्चं तु मे देवदेव श्च सर्वे ॥ पतिरथे ततो गत्वा अर्घं दद्यात् फलान्वितं ॥ अज्ञानात् ज्ञान
तो वापि यद् दुष्कृतं मया कृतं ॥ तत्सर्वं क्षम्यतां देव प्रसीदतु रूपो मम ॥ अथ प्रार्थना ॥ सर्वदेवमयोपस्मात्
सर्वतीर्थमयः पतिः ॥ तस्मै जीवननाथाय नमोस्तु परमात्मने ॥ इति प्रार्थना ॥ विन्यस्य सूतकं नत्वा चि
तां मध्ये पुपल्लतः ॥ चिरमर्थं तु प्रदातव्यं फलैश्च विविधैः शुभैः ॥ चितिस्थो भगवान् ब्रह्मा विष्णुरूपी सनात
फलैश्च विविधैः शुभैः ॥ चितिस्थो भगवान् ब्रह्मा विष्णुरूपी सनातन ॥ पतिलोकमवा

५८ राम ५९

१म्य

र्थं गृहाणार्घ्यं नमोस्तु ते। क्षमापय पितातातान्लोकान्साध्वी हस्तेपतिर्मुखे। एकस्मै इति मंत्रेण घृतहोमं तु कारयेत।
ततः साध्वी घृताभ्यंगं विधाय तुलसीदलं पंचरत्नं मुखे हि स्थापयेत्। कुर्यात्प्रदक्षिणां। प्रदक्षिणां पंचकृत्वा दीपि
कां तत्र साध्वी नवा ब्रवीति तां। वंदे चंडिकां सर्वजनमोपहारिणीं समग्रकर्त्री जगदंब हे हितैषिणी। वंदे प्रसीद सततं प्रसन्ना
भिप्रकाशय त्वं मम मन्तुं गामी। अस्मात्त्वम् इति मंत्रेण अग्नौ स एकाहुतिः। **अथ प्रवेशनमंत्रः।** किमपानकृतं स घोम
वे घृदिनवानघ। इदं शरीरं मा लिंगय प्रविश्य पावकं कुलाशनं। भर्तुश्च रागो हृदये ध्यात्वा श्रीजगदीश्वरं। ततो वह्नि
प्रार्थना। फलपुष्पांजलिं कृत्वाग्निं प्रार्थयेत। त्वमग्ने सर्वभूतानामंतश्चरसि साक्षिवत्। त्वमेव देव जानीषे न वि
दुर्यान्ति मानुषं। अनुगच्छामि भर्तारं वैधव्यभयपीडिता। सत्यमार्गप्रदानेन नय मां भर्तुरंतिकं। इदं शरीरं सकलं द
ग्धा कृशानो कुरु दिव्यमाशु। तथा त्वं न भर्तुः कुरु दिव्यदेहं भर्तुः समीपं गगनात्व्रजामि। इत्युक्त्वा साहसं दृढा करतालैः
प्रदापयेत्। हरिशब्दादि स्वजनैर्ब्रूयात्॥ **॥इति सहगमनविधिः॥** ॥अन्वारोहणं स्त्रीणां नान्यो भर्तुरेव च।
सर्वपापसमुच्छक्षपकरं। निरपो माश्मरणायवा। जन्मांतरे च सौभाग्यं धनपुत्रादि हृद्धिदे। हारीतः। मृते भर्त्तरि या नारी
धर्मशीला दृढव्रता। अनुगच्छति भर्तारं श्मशाने तस्य स्तु पकलं। तिस्रः कोटयोर्द्धकोटी च पापाय वसं गृह स्वर्गे ह्यादि वै। तावं

६०

60

ण्यष्टसहस्राणि स्वर्गलोके महीयते। कुलत्रयं पुनात्येषा भर्त्तारं यानुगच्छति॥ यावन्नाग्नौ दहेद्देहं मृते हं पत्यौ प
तिव्रता। तावन्नमुच्यते नारी धर्मशीलाप्यव्रता। आर्त्तार्त्ते च मुदिते हृष्टा प्रोषिते मलिना कृशा॥ पतिव्रतानुया
नारी साध्वी ज्ञेया पतिव्रता। न म्रियते समं भर्त्रा ब्राह्मणी शोकमोहिता। प्रव्रज्यागतिमाप्नोति मरणादात्मघातिनी
। यदि भर्त्तृनिकृत्ते म्रियेत महत्फलं भवेत्। यावन्नाग्नौ म्रियेत पत्यौ न स्यात्मानं दहेत् क्वचित्। तावन्न मुच्यते नारी
स्त्रीशरीरान्नु गर्हिं चित अन्वारोहणं तु गर्भिणीनां ब्राह्मणाः एकचितारोहणमेव। पृथक्चितारोहणं। क्षत्रि
यादिस्त्रियाः पृथक्सहवा चितिः। असवर्णायाः पृथक् चितिरेव मदनपारिजातमते। आपस्तंबः। चितिभ्र
ष्टानुया नारी मोहाद्विचलिता भवेत्। प्राजापत्येन शुध्येत तस्माद्धि पापकर्मणः। भर्त्तुरनुगमने चितिभ्रष्टेत्यर्थः।
पत्न्या रजस्वलायां पराभर्त्रा मृतः सा च देशकालवशात्तद्देशानुगन्तुमिच्छति न पंचमादिदिनं प्रतीक्षते। तत्र वि
धिरुच्यते। यदि स्त्रियामृतुस्नायां पतिः प्राणान्समुत्सृजेत्। द्रोणमेकं तंडुलानां अवघ्नन्त्या हि शुद्धये। मुसलाघा
तैस्तत्कृत्वा तेयोनिमंडलात्। विरजस्कामन्यमाना स्वचित्तेन तदनुक्तरूपं। दृष्ट्वा शौचं प्रकुर्वीत पंचवह्निकपाः
पृथक्। त्रिंशत्सद्विंशतिर्दद्यात् पंचगव्यं दत्वा सहदहः कमात्। विप्राणां वचनात्। हुताशमारोहेद्धुताशनं। वारिणा

रा०म०

६१

मरजस्कानां इयं शुद्धिरुदाहृता। अथ रजस्वलामरणे विधिः॥ ॥अंतरिक्षे मृतायै च वक्ष्यावस्तु प्रमाणतः। उदक्यासूतिका
नारी चरेद्वा शापणत्रयं। मंत्रहे। पंचभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां। वस्त्रांतरधृतां कृत्वा दाहयेद्विधिपूर्वकं। वृ
द्धशातातपः। रजस्वला यदा प्रेता या संस्कारादीन्नाचरेत्। ऊर्ध्वं त्रिरात्रात्स्नाता या शवधर्मेण दाहयेत्। इति व्य
होत्तरसंस्कारमाह। अत्र देशकालाद्यनुस्मरणाद्यवस्था। अद्येत्यादि। अमुकगोत्रायाः अमुकरजस्वलायाः वस्या मरण
निमित्तअस्पृश्यदोषपरिहारार्थं और्ध्वदेहिकयोग्यसामर्थ्यार्थं चांद्रायणत्रयं प्रायश्चित्तपूर्वकं शूर्पेणांभोभिः शतं स्ना
निकारयिष्ये। इति ब्राह्मणवचनेन चांद्रायणत्रयं कृत्वा पश्च पिष्टेन प्रेतमनुलिप्य तपं स्नात्वा शूर्पोदकेन शतवारं स्ना
पयेत्। प्रेतं प्रक्षाल्य भस्मगोमयमृत्तिकाकुशोदकपंचगव्यशुद्धोदकैः स्नापयेत्। पावमानीभिः स्वस्त्ययनीभिर्वरुदं ति
र्यच बृहत्केतं आपो हिष्ठेति तिसृभिः कयानइति तिसृभिः संस्नाप्य पूर्ववस्त्रं परित्यज्य विधिना दहेत्। तापद्वारजस्वलां मृ
तिकां च मलस्नानं स्नापयित्वा कांचुवदंतं ग्राम्यीनि विधिना दहेत। इति रजस्वलामरणविधिः॥ ॥अथ पाथे
यश्राद्धं॥ अस्थिसंचयनानंतरं पाथेयश्राद्धमिति स्मृत्यर्थसारे। पाथेयश्राद्धं केचित्कुर्वंति। केचिन्न कुर्वंति।
ततः अमुकेत्यादि प्रेतस्य संतोषकं भवन्मुक्त्वा मनुष्यलोकात्प्रेतलोकगमनार्थं पाथेयश्राद्धमहं करिष्ये इति सं

६१

67

कल्पयाद्यासनार्घ्यार्चनाच्छादनामात्रपिंडतिलोदकम्। आ सूत्र तत्रउशास्त्रं दत्त्वा संगतानस्मो कपातदिस्ना
नांते विषमश्राद्धवत्सर्वं पूर्ववत्कुर्यात्। अस्मिन् श्राद्धे दक्षिणास्थाने उदंदानमानं यथाशक्ति सोपस्करं स
घृतं सोदकुंभं सवस्त्रकां संपयाशक्ति सुवर्णरजतताम्रलोहं दक्षिणोपेतं सोपानत्कं सोदपात्रमुपतिष्ठता
मिति दद्यात्। सर्वत्राम श्राद्धे आमं यथाशक्त्या दशगुणमष्टगुणं पंचगुणं चतुर्गुणं द्विगुणं वा दद्यात्। इति
पाथेयश्राद्धं॥ ॥अथोदकुंभश्राद्धं॥ तत्र याज्ञवल्क्यः। अर्वाक् सपिंडीकरणात् यस्य संवत्सराद्भवेत्। त
स्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विजे। गौतमः॥ अहरहः पार्वणश्राद्धं सोदकुंभं सधर्मकं। कुर्यात्त्र्यस्वाहिका
छाद्यास्यं कल्पविधिनान्वहं। अधर्मकर्म पुनर्भोजनादीनि नियमरहितं यथा चेदं कृते वा सपिंडने त्रयोदश
दिनारभ्य यावद्वर्षं प्रतिदिनं कार्यं अशक्तौ प्रतिमासं तच्चाकृते सपिंडने एकोद्दिष्टं कृते तु तस्मिन्सो यथा पार्व
णमेकोद्दिष्टं वा मन्नाह श्राद्धं कुर्यात्। तथैवमकृ पात्र ततो वर्षात्मा दिने संवत्सरविमोक्षश्राद्धं पार्वणविधिना शक्त्या
भूरिब्राह्मणभोजनं कुर्यात्। इत्युदकुंभश्राद्धं नक्तं। अथ मातापित्रोर्मरणे प्रथमाहे विहितनिषिद्धानि। तत्र धवल
निबंधे देवलः। प्रमीतौ पितरौ यस्य देहस्तस्माशुचिर्भवेत्। न देवं नापि चापि पित्र्यं यावत्पूर्णो न वत्सरः। तथा। महागुरुनि

रा०म०
६१

पाते तु प्रेतकार्यं यथाविधिः। कुर्यात्तत्र संवत्सरादर्वाक् एकोद्दिष्टं न पार्वणं। अमदीपमितस्पर्शः। स्नानं चैव महादाने
स्वाध्यायं वाग्नितर्पणं। प्रथमेऽब्दे न कुर्वीत महागुरुनिपातने। तथा सर्वेषां प्रेतकार्याणि महागुरुनिपातने।
कुर्यात्संवत्सरादर्वाक् श्राद्धमेकं तु वर्जयेत्। महागुः। माता चैव तथा भ्राता भार्या पुत्रस्तथा स्नुषा॥ एषां मृतौ चरे
च्छ्राद्धमन्यस्य न पुनः पितुः॥ तथा॥ माता चैव तथा भ्राता पत्नी वै व विपद्यते। तत्र श्राद्धानि कुर्वीरन् न कुर्याज्ज
नके मृते। एतत्संवत्सरपर्यंतमकृते सपिंडे हे यमिति केचित्। अन्यत्र। अस्थिहेपंगपा श्राद्धं श्राद्धं वा परमा
सिकं। अब्दमध्ये न कुर्वीत कृते पितृसपिंडने। अस्यापवादः। अस्थिहे पंगपा श्राद्धं श्राद्धं वा परमासिकं। प्रथ
मेऽब्देऽपि कुर्वीत यदि स्याद्भक्तिमान् सुतः॥ भक्तिमान् भक्त्या स्वेश्राद्धे देवतालपोग्यतासंपादकः श्राद्धं तदानू सत
एतानि कुर्यात् इत्यर्थः। अन्ये तु यथाश्रुतं व्याचक्षते॥ एतस्य च विषयविवेको ऽस्माभिः कृते त्रिस्थलीसेतौ गयाप्रक
रणे द्रष्टव्यः॥ ॥ अथ पालाशप्रतिकृतिदाहविधिः॥ ॥ तत्र देशांतरमरणे यावत्कदापमष्टो कृष्णानूकृत्वा
स्मानि दहेत्। यद्यस्थीनि। वांछा लब्धाहिभिः स्पृष्टानिरस्थुस्तत्पंचगव्यं गंगोदकाभ्यां प्रक्षाल्य विधिना दहेत्। अस्त्र
यपस्याप्सी। अपिलभ्यं नेतस्य पर्णाशरदाहः सचैवं। शुचिभूमौ कृष्णमृगचर्मण्यास्तीर्य तदुपरि कुशैरं दक्षिणाग्र

६२

62

पत्रं निवेश्य तदुपरि पालाशानि त्रिशतानि षष्टिसमेतानि। शिरसि चत्वारिंशतं। इत्यादि प्रयोगवत् षष्ट्यधिकशतत्रयमितैः प-
र्णशरैः शरीरं निर्माय ऊर्णासूत्रेण शरेण सह बध्वा जलालोडितयवपिष्टेनानुलिप्य तत्र शङ्खौ सत्यां वस्त्र-
माणान्यपि कार्याणि नालिकेरं शिरःस्थाने इत्यादि पूर्ववत्। वैतरणीपादिदानपूर्वकं कृष्णाजिनेनाच्छाद्य ऊर्णा-
सूत्रेण वेष्टयित्वा पूर्वोक्तविधिना शवदहनं पालाशवृन्ताभावे कुशैः प्रतिकृतिं कुर्यात्। आहिताग्नेः प्रकृतिद-
हे अस्थिदाहे वा दशाहमेवाशौचं। आहिताग्नेस्तु अहं पर्णशरदाहे पुत्रपत्न्योः गृहीताशौचयोः दशाहादिपू-
र्णमेव गृहीताशौचयोस्तु तयोरपि त्र्यहमाशौचं पत्नी पुनःसंस्कारे पत्युश्चैवमेव आशौचं अनाहिताग्नौ विदेशस्थे
मृते स्नावधिधीनां न संस्कारः। तावत्सुतादीनां नाशौचं। न च संध्यादिकर्मलोपः॥ ॥अथ पुनःसंस्कारे कालशुद्धिः॥
आशौचमध्ये पुनःसंस्कारे यथासंभवदिने संशोध्यं। कालान्तरे तु शोध्यमेव। संवत्सरादूर्ध्वं प्रेतकार्ये उत्तरायणं
श्रेयान्। तत्रापि कृष्णपक्षतिथिः पुनः त्रयोदशी चतुर्दशी दिनक्षयं च वर्जयेत्। शुक्रशनिवारौ वा नक्षत्रे पुभर-
णी कृत्तिकाश्लेषा मघार्द्रामूलपंचके। परिघो विष्टिः क्रूरयोगः व्यतीपातेति वैधृतः। रिपुवर्षे चन्द्रो पितृयाशुक्रा-
नेश्वरे। त्रिपुष्करादिमानानि दुष्टानि प्रेतकर्मणि। मघायां भौमवारेण चतुर्दश्यां च जन्मभे। प्रेतश्राद्धं न कर्तव्यं कु-

रा० म०

६२

लक्षपंक्तं रोहिततारोहिणीमृगशीर्षपुनर्वसुपूर्वोत्तराचित्राविशाखानुराधापूर्वाषाढोत्तराषाढाद्विपुष्यरोणिवेष
दुष्टानि संभवे वर्ज्यानि शिष्टान्यदुष्टानि सर्वथा दिशाशुद्धं संभवेऽनतिदुवासनस्त्वं ग्राह्यं पुनःसंस्कारे श्रोतरं
ग्राह्यं। नंदापापांशुक्रे चतुर्दश्यां त्रिजन्मनि नक्षत्रेषु एकोद्दिष्टमति निषिद्धं। एकादशाहादौ न निषेधः। तत्र तिथ्या
हिनेवशोध्यं। युगादिमन्वादिसंक्रांतिअमावास्यासु एकोद्दिष्टमति निषिद्धं। एकादशाहादौ न निषेधः। तत्र तिथ्या
समावास्यासु प्रेतकार्ये पुनःसंस्कारे च किंचिदपि नैव शोध्यं। इदं तु सपेव संक्रांतो मन्वादिषु पुण्यादिषु न किंचिद
पि संशोध्यं प्रेतकृत्समस्तं द्विदुः। अथाधिकारिणः। सर्वत्र स्नाहपिंडादिअपतितादिज्येष्ठऔरसः पुत्रः कुर्यात्। तद
सन्निधौ कनिष्ठः। तेषां सर्वेषामसन्निधौ पौत्रो ज्येष्ठपुत्रपौत्रादिक्रमेण। तदभावे तथैव प्रपौत्रः। एषामभावे पुत्रिका
पुत्रादयः। पुत्राः क्रमेण। तदभावे तत्पुत्रादयः पूर्ववत्। उक्ताभावे पत्नी। एवं पुत्राद्यभावे पत्न्यभावे सभ्रातृ तदभावे सपत्नीस
पत्न्यभावे भ्रातुः पुत्रो भ्राता जामाता स्नुषा दुहिता दौहित्रः अन्यः सगोत्रः सपिंडः सब्रह्मचारी मित्रं शिष्यो गुरुः बांधवो धनसं
बंधिवा दद्यात्। न पुत्रस्य पिता दद्यात् नानुजाग्रस्याग्रजन्म यानपौषापाः पति ईयात् अपुत्रस्य त्रिपास्वपि। यदि
स्नेहे न कुर्वीत सपिंडीकरणं विना। इदं सति संभवे अन्यकन्यायै पितरौ ऽन्यः अभावे दत्तानाम पितावेव दौहित्रमातामहौ

परस्परं। मातामहस्तस्यैव हित्रोपाध्यायतः श्वशुरो मिथः। श्वश्र्वाः स्नुषा भ्रातरौ मिथो दन्तः। गुरुशिष्यौ परस्परं सर्वाभा
वेपः कश्चित्कुर्यात्। तस्य सर्वसंपत्प्राप्तिः। वर्षत्रयानन्तरं चूडाभावेपि॥ अर्धद्विहिकं मंत्रवत्कुर्यात् वर्षत्रयाद
र्वाक्कृतचूडो विशाक्को सर्वं मंत्रवत्कुर्यात्। पंचशाक्कोऽकृतचूडोऽत दाहाग्निदानं मंत्रवत्कुर्यात्। शिष्टमन्येन कारयेत्।
एवं पत्न्या अप्यग्निदानमात्रं समंत्रकं कार्यं। शिष्टमन्येन कारयेत्। तथा च कात्यायनः। असंस्कृतेन पत्न्या वस्याग्निदानं स
मंत्रकं। कर्तव्यमितरत्सर्वं कारयेदन्यमेव हि। सुमंतुः। अनुपेतोपि कुर्वीत मंत्रवत्पैतृमेधिकं। यद्यसौ कृतचूडः स्या
दिस्माच्च त्रिवत्सरः। सपिंडीकरणाद्र्वाक् भावि निश्राद्धानि विभक्तोऽविभक्तो वा समविहितमेक एव हि कुर्यात्। न
त्वविभक्तोऽर्थ्यायां क्लिश्वकीयं द्रव्यं देयं। गृह्यपरिशिष्टे। असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमे
हनि यो दद्यात् स दशाहं समापयेत्॥ तथा शालिना सक्तुभिर्वापि शाकेनाप्यथ निर्वपेत्। प्रथमेहनि यद्द
द्यात्तद्दद्याद्दशाहिकं॥ तथा॥ वस्त्रोत्तरीयपशिल्पपात्रे कर्तव्यविपर्यये। पूर्वेद्युर्जलीन्द्र घात् पिंडदा
नं तथैव च। आचार्यविपर्यये ह्येवं। एकादशाहादिकं तु दशाहकर्ता ज्येष्ठपुत्र एव वा कुर्यात्। सपिंडीकरणं
तु पोग्योज्येष्ठपुत्र एव वा कुर्यात्। कनिष्ठोपि वा। ननु पुत्रा अन्यः। पुत्रे सति नान्यस्तत्राधिकारी। पर्वीपस्मात्कृतं

कर्मसपिंडीकरणादिकं ॥ तस्मात्सापिकर्मण्यं प्रेतशब्दं विहाय चापवीपमाहृतं कर्म प्रेतशब्दं विहाय
नुतस्मात्सापिकर्मण्यं सपिंडीकरणं पुनः ॥ विभक्तास्तु द्विकामाश्चेत् पृथक्कुर्यु अपि सपिंडीकरणं कुर्यु
ः ॥ अविभक्ताः सुतेषु वार्षिकादि श्राद्धं एक एव कुर्यात् ॥ विभक्ताः प्रत्येकं पृथक्कुर्युः ॥ अथ ब्रह्मचर्यादीनां दहनो
दकदानाद्येष्वधिकाराभावो व्यसने ॥ पाखंडादीनां मतानां नाधिकारिणां पिंडदानादिनकार्यं ॥ तदाह याज्ञवल्क्य
॥ पाखंडानाश्रिताः स्तेना भर्तृघ्न्यः कामगादिकाः ॥ सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः ॥ वेदवाह्य
लिंगधारणं पाखंडं ॥ अनाश्रिताः श्रिताः सत्स्वपि अधिकारे आश्रमविशेषरहिताः ॥ स्तेना ब्राह्मणसुवर्ण
व्यतिरिक्तानमनुष्यहारिणः ॥ सुराप्य इत्यादि उद्देश्यगतात् लिंगमविवक्षितं ॥ आशौचग्रहणं चैव तन्मरणे
नकार्यमित्यर्थः ॥ आत्मत्यागिनो बुद्धिपूर्वकमात्मघातिनः ॥ तेषामविशेषमाह गौतमः ॥ प्रायोनाशकशस्त्राग्नि
विषोदकोद्बन्धनप्रपतनैश्चेच्छतामिति ॥ प्रायो महाप्रस्थानं ॥ अनाशनमनशनं ॥ प्रपतनं शैलादेः
पातः ॥ इत्यादिनिमित्तैः शास्त्रविहितमार्गेणेच्छापूर्वकमतानामाशौचादि नेत्यर्थः ॥ तथाङ्गिरः ॥ चांडा
लाद्दुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि ॥ दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणां ॥ उदकं पिंडदानं च प्रेतेभ्यो

६५

यस्त्वदीयते सोपतिष्ठति न स्वर्गं अंतरिक्षे विनश्यति। आश्वलायनगृह्यपरिशिष्टे पि चांडालाद्युक्ता न संस्का
रविधिस्तेषां नैव कार्यो दकक्रिया। रोदनं नैव कर्त्तव्यं सूतकं च न बंधुभिः। दग्ध्वा शरीरं प्रेतस्य संस्थाप्यास्थीनि
यत्नतः। प्रायश्चित्तं कर्त्तव्यं पुत्रैश्चांद्रायणत्रयं। मनुः। वृथा संकरजातानां प्रव्रज्यासु च तिष्ठतां। आत्मनस्त्यागि
नां चैव निवर्त्तेतोदकक्रिया। वृथाजाताः पंचमहायज्ञरहिताः संकरजाताः प्रतिलोमजाः प्रमादादनुपूर्वो
क्तनिमित्ते मरणे प्रायश्चित्तमुक्तं। चांडालादिहते विप्रे तं तदिच्छन्मृते पिता। कृत्वा तिलकृच्छ्रं चांद्रं स्तुशुद्धिस्तत्र प्र
कीर्त्तिताः। तथाविधे प्रमादमरणे भवत्येवाशौचादि। तथाहांगिराः। अथ कश्चित्प्रमादेन म्रियेताग्न्युदका
दिभिः। तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया। इति वचनात्। प्रमादे चांद्रायणं तप्तकृच्छ्रद्वयं कार्यं। यद्वा
पंचदश कृच्छ्राणि वा कुर्यात्। ततो विधिना दहनादि। बुद्ध्या चांडालाग्निमृतादीनां प्रतिपत्तिस्मृत्यर्थसारे उक्ता चेता
नं प्रक्षिपेदप्सु आ वत्सरं चतुष्पथे। पात्राणि तोदके दग्धोपजमानैव यथागतो वृथा अविहितमार्गेण। तेषां
शरीरं गंगायां वन्यत्र वा महानद्यां क्षिपेत्। कात्यायनेनाप्युक्तः। पद्मलौकिकाग्नौ अमंत्रकं दग्ध्वाऽस्थीनि स्था
पयित्वा प्रायश्चित्तं नारायणबलिं सार्द्धं कृत्वा अस्थीनि क्षीरेणाहृत्य पित्रा विधिना दहेत्। श्राद्धं च कुर्यात्। प्रायश्चित्तेन

राम
६४

रायणावली च वत्सरांते लोकगर्हापरिहारार्थं श्राद्धादौ योग्यतार्थं च कार्यो। नारायणबलिः कार्यो लोकग
र्हाभयान्नरैः। तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यादी महति उक्तेः। तेषां पापत्वं ब्राह्मणादीनां बुद्धिपूर्वात्मघातकानां चे
त्यर्थः। अथैषामतिभक्ताः पुत्राद्याः संततिदात्म धर्मकृपया प्रायश्चित्तं द्विगुणं चांद्रायणद्वयं तप्तकृच्छ्रचतुष्टयं वा। प
ञ्चत्रिंशत्कृच्छ्राणि कृत्वा पापवृद्ध्यादीनां योग्यसर्वप्रायश्चित्तं वत्सरान्ते नारायणबलिं च कृत्वानंतरं देवकालांतरे वा वत्स
रान्ते वा गिपिंडादिह श्राद्धादि कुर्युः। अनित्यश्च नित्यश्चाक्वापुषः। अकृतनिष्कृतीनां पापबुद्ध्यादीनां शवानां स्पर्शात्ताना
लंकरण वहन रज्जुच्छेदनदहनाश्रुपातकथादीनां ज्ञानात् तप्तकृच्छ्रम् महासांतपनं चरेत्। ज्ञाते तप्तकृच्छ्रं एतेषु एकैककरणे
त्वज्ञानादुपवासः। मत्याभ्यासे कृच्छ्रातिकृच्छ्रं चांद्रायणं योग्यतां कुर्यात्। पशुवृक्षादिरपि विकित्स्यगुरुव्याध्या
द्विसुतः प्रत्याख्यातभिषक्क्रियो बुद्धिपूर्वकमप्यात्मानं घातयति प्रपागात्सेवानं तस्य दोषः। शास्त्रानुज्ञातमरण
त्वात् तस्य प्रायश्चित्तं नारायणबलिनक्तः। त्रिरात्रमेवाशौचं। चतुर्थेऽह्नि एकादशाहकृत्यं पंचमे सपिंडनं। यहे
शौचे पिंडः त्रयः दशका। ततस्त्र्यहे सेवाक्षिपिंडचतुष्टयं पंचत्वारः। चत्वारिंशद्धांजलयः। द्वितीयदिने स्थिसंच
यनं। एवमस्माप्यस्महाशौचे ब्रह्मचारिभिः सर्वोक्तपापपंक्त्यादिभिः पतिते क्लीबे अकृतांतरप्रायश्चित्ते ब्रतेष्वसपिं

उदिष्टमरणेऽस्त्वनाशौचेऽस्त्वकृत्यान्यादिकार्यं ब्रह्मचारी प्रक्रान्तं प्राप भिक्षुरन्यान् पितृमहागुरून् मातामहाचार्योप
ाध्यायानां कुर्यादेव तत्र लोपो नास्ति। किंतु। मृतकान्तानान्तर्भोपातन् छूनिमिः सह वसेत्। माचादिस्मृतिरिक्तेषु क
र्मकरणे पुनरुपनयनं ब्रह्मचारिणः पातकं स्मृतः। सत्यामानामहाचार्यः प्रेतानामपुरुषकक्रियाः। कामोदकं सखि प्रत्ता
स्वस्त्रियश्चसुरर्त्विजां। कामममित्युक्तेः संख्याह्यवहानेऽपि न दोषः यमन। अंजलिसंख्या च विदिता वउक्तः। पाषाणेन
तत्राद्यपविशेद्धाः दशांजली नृपाद्दश सत्रिपेद्घात् वैश्यपेपं च दशस्मृताः। त्रिंशच्छूद्रस्य दातव्या स्नातः संभवि शे
कृहं। अथ षोडशश्राद्धानि तानि चामासिकानि एकोद्दिष्टं चाद्यैर्द्वैमासिकं। ऊनाहं मून षाण्मासं प्रेतश्राद्धानि
षोडश। परस्मैतानि न दीयन्ते प्रेतश्राद्धानि षोडश। येन त्वं सुस्थिरं तत्प्रमदेश्रेः श्राद्धशतैरपि। अर्धार्द्धमासं त्रैपाक्षि
कं। नवश्राद्धस्य पिंडत्वं श्राद्धान्म पिच षोडश। एकैकैने वृचकार्पणि मं विभक्ति धनेष्वपि। तत्र च पथ्यां शं सर्वैद्रव्यं रूपं
पत्र सद्यः शौचं नप्रयांते। सद्यःशौचेऽपि कार्यं प्रेतस्यैकादशाहदि छ्वतौ। किंचित्। तत्रापि सद्यःशौचवदेक
दशाहमप्याहुः। नवश्राद्धमासमिषो विद्येकरण्व। नवश्राद्धमासिकं च द्वादशं नरितं भवेत्। तदूर्ध्वं सत्यन्ते श्राद्धत्रुटेषं
प्रवदन्ते। अंगिराः। प्रथमेऽह्नि तृतीये च पंचमे सप्तमे तथा। नवमैकादशे चैव नवश्राद्धं प्रकीर्तितं। शिवस्वामीमते।

न कुर्याद्वा निर्वपं वा कुर्यात्स्वल्पं यत्नशालिनः। आपस्तंबः। षडिमा कुर्वीमा या नैत्रिरी पितॄणः। पंच एकादशाहं अप
पिंडैकेण। न विष्णुपुराणे। वर्णितोपि अवस्था। नवसप्त विंशं राज्ञां नवश्राद्धान्यनुक्रमात्। आद्यं तपो वर्णयो
स्तु षडिमा कुर्मे हर्षपः। विंशं नव ईराज्ञां सप्त ७ तथा। श्वेतश्राद्धे तु पत्नी ब्रह्मछर्माद्ये परिकल्पितं। पक्षे श्वेतो ज्ञानता
ओ क्वाशेषेषु सुभुक्तनामनाः। तेन श्राद्धे न विकिरः। तिस्मा तिरतावल्मा। तथा। द्वादशाहे पष्ठकुर्पा व पितुः पुत्र
सपिंडनं। एकादशो क्रिकुर्वीत प्रेतश्राद्धानि षोडश। वस्त्रालंकारशय्यादि पितुर्यद्वाहनादिकं। गंधमाल्यैः सम
भ्यर्घ्य श्राद्धभोक्ते निवेदयेत्। तथा। सुमंतः। आशिषो द्विगुणा दर्भा जपाशी स्वस्तिवाचनं। पितृशब्दः स्वसंबंधश
मशब्दस्तथैव च। पात्रालंभोवगाहश्च उल्मुकोल्लेखनादिकं। तृप्तप्रश्नश्च विकिरः शेषप्रश्नस्तथैव च। प्रदक्षि
णा विसर्गश्च। सीमांतगमनं तथा। अष्टादश पदार्थाश्च प्रेतश्राद्धे विवर्जयेत्। तदुक्तं वायुपुराणे। आशिषं
द्विगुणान्दर्भान् स्वस्त्यस्तु प्रणवं तथा। अग्नौकरणमुच्छिष्टं श्राद्धे वैश्वदेविकं। विकिरं न स्वधाकारं पितृशब्दो न
विद्यते। अनुशब्दं न कुर्वीत नावाहनं तथोल्मुकं। आसीमांतं न कुर्वीत प्रदक्षिणाविसर्जनं। तथा। एकोद्दिष्टेषु स
र्वेषु न स्वधाभिरम्यतां। स्वस्त्यस्तु विसृजे देवं सकृत्प्रणववर्जितं। एकोद्दिष्टसपिंडे तु अन्नशब्दो न विद्यते। पितृश्

ष्टं न कुर्वीत पितृणां चोपनायते। तथा। न धूपं न दीपं न स्वधा न नमस्कार इति न स्वधा प्रायणा धूपं दीपो चैव न पस्तृतिः।
इति गृह्यकारिकायां। नाशिखो द्विगुणा दर्भास्तस्य तु प्रणाणो जपः। विकरं पितृशर्मानुशहोमा मा विसर्जयेत्। आसी
मांतं स्वस्ति वाचं पिंडानां च नमस्कृतिः। न पुष्पं पिंडमूर्ध्नि स्थं वदेद्विप्रकाश्चुतं। सपिंडीकरणं यावत् ऋजुदर्भैः पितृक्रिया
। सपिंडीकरणादूर्ध्वं द्विगुणो विधिवद्भवेत्। पतिपुत्रवती नारी भर्तुरग्रे मृता यदि। वृषोत्सर्गं न कुर्वीत गां दद्यात्तु पयस्वि
नीं। अन्वारोहणे तु। न श्राद्धानि सर्वाणि न सपिंडीकरणं पृथक्। एक एव वृषोत्सर्गो गौरेका तत्र दीयते। यतीषु शा
तापः। एकोद्दिष्टं पिंडं आशौचं प्रेतसत्क्रिया। न कुर्यात् पार्वणं दद्यात् ब्रह्मीभूताय भिक्षवे। उशनाः। एकोद्दिष्टं न
कुर्वीत यतीनां चैव सर्वदा। अहन्येकादशे प्राप्ते पार्वणं तु विधीयते। सपिंडीकरणं तेषां न कर्तव्यं सुतादिभिः। त्रि
दंडग्रहणादेव प्रेतत्वं नैव जायते। मातृविषये शंखः। मातुः सपिंडीकरणं कथं कार्यं सुतादिभिः। मातामह्यादिभि
:सार्द्धं सपिंडीकरणं स्मृतं। कारिकायां। पितामह्यादिभिः सार्द्धं मातरं तु सपिंडयेत्। अन्वारोहणे तु यमः। पत्न्या चै
के न कर्तव्यं सपिंडीकरणं स्त्रियाः इति। पत्नी विषये पैठीनसिः। अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडनं। श्व
श्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेत्। सपिंडीकरणे च ज्येष्ठपुत्रस्याधिकारः। तुअभेवा पुत्राणां श्राद्धानि वो

द्वादशाहत्वाकुर्यान्नित्तु सपिंडनं। प्रोषितावसिते पुत्रः कालादपि चिरादपि। यदि षोडशश्राद्धानि कनिष्ठश्चानादि

नाकृतानि यदीमपिंडत्वमेव कुर्याद्विप्रपरके। पितृदशाहं कुर्यात्सहिपुत्रो मृतस्तदा। तत्सुतः पित्रोर्ध्वदेहिकानंतरं

पितामहस्य पुनः संस्कारं कृत्वा सर्वमावर्तयेत्। अतीते तु दशाहे वं। तथा। अशक्ता पिंड्यानुष्ठाने तपौत्रे पितामह

हश्राद्धे उपक्रांते पितृमरणे सति पित्राशौचवहत्रै स्वकाले पितामहश्राद्धं पौत्रः कुर्यात। अक्रांतत्वादिति मदनपा

रिजाते गोभिलः। द्वादशाहाहिकाले तु प्रमादादननुष्ठिते सपिंडीकरणं कुर्यात्तत्कालेषून्नरक्षा विष्णुः। शुद्धस्मृतौ। वि

ष्णुः सर्ववर्ज्यं हि शूद्राणां द्वादशेह निकीर्तितं। अमावास्या श्राद्धकारिसूत्रविषयमेव तत्ऽत्र परांके कल्पतरौ वा

वचनबलाद्वाशौचमध्य एव कार्यं। कात्यायनः। सर्वेषामेव वर्णानां आशौचांते सपिंडनमिति तदेतदपि

रिक्तविषयं। ब्रह्मपुराणे। आशौचांताद्द्विवर्णानां दशमे पिंडभुक्तजेत। श्राद्धे पिंडदानांते सुखार्थं श्राद्धमाचरेत्।

सपिंडीकरणेप्युक्रमम न्येतु। ब्रह्मपुराणे। मृते पितरि यस्यापि विद्यते च पितामहः। तेन देयास्त्रयः पिंडाः

प्रपितामहपूर्वकाः। तेभ्यश्च पैतृकः पिंडो नियोक्तव्यश्च पूर्ववत्। मातर्यथ मृतायां तु विद्यते च पितामही।

प्रपितामहीपूर्वं तु कार्यस्तत्राप्ययं विधिः। व्युत्क्रमात्तु प्रमीतानां नैव कार्या सपिंडना। नीतु मातापितृभर्तव्यातिरि

६७

67

ऽर्विषयं तएव स्मार्ते । क्रमेण मृतानां च न सपिंडीकृतिरिष्यते । यदि माता यदि पिता भर्ता वैषविधिः स्मृतः । एवं
विधिः सपिंडननिषेधरूपः ॥ स्त्रियादिरपि महैकोद्दिष्टमेकादशेऽह्न्येव कुर्यात् । न तु सूतकांते । तदाह वृद्धवसि
ष्ठः । एकादशे द्विपक्षे वा तस्मात्पात्रमुदाहृतं । चतुर्णामपि वर्णानां सूतके तु पृथक् पृथक् । लौगाक्षिरपि । आ
द्यश्राद्धमशुद्धोपि कुर्यादेकादशेऽहनि । कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव च । हेमाद्रिगणेशाद्यैस्तु स्त्रियां मृता
हायां पंचपंचदशेऽहनि कार्यं । स्याद्यदाहनि सं प्राप्ते स्नानं ग्रामाद्बहिर्भवेत् । तत्र तत्सानिवासास्तिके शश्मश्रु
न्तवानि च । इति देवलस्मरणात् । अनुभाविनां च परिवापनमित्यापस्तंबः । असार्थः । शावं दुःखं अनुभवतीत्य
नुभाविनः सपिंडास्तेषां च श्वविशेषे तावपनं । तत्र अल्पवयसामित्यपेक्षापानाहुर्वादिमूलकांते तु भोजप
त्पुत्रो द्विजानितिमत्स्यपुराणात् । इदं हेमाद्रिगणेशपरलेनव्याख्यातं । मदनपारिजाते गोभिलः । ब्राह्मणं भोजयेद्दा
घेहोतव्यमनले यवापुनश्च भोजयेत् । द्विजे द्विरा हुति भवेदिति । इदं चाग्निभासिकाद्याहिकपोः सिद्धार्थे ॥
अंगिराः । पस्मसंवत्सरादर्वाक् सपिंडीकरणं कृतं मासिकं चोदकुंभं च देयं तत्स्यापि वत्सरं । पैठीनसिः । सपिं
डीकरणादर्वाक् कुर्यात् श्राद्धानि षोडश । एकोद्दिष्टविधानेन कुर्यात् सर्वाणि तानि तु । सपिंडीकरणादूर्ध्वं यदा

ए०स०
६७

कुर्यान्नरा पुनः । प्रसङ्गं यो यथा कुर्यात्तथा कुर्यात्स्वनाम्नपि । शाखायां पुनः । सपिण्डीकरणादूर्ध्वं कृत्स्नं पक्षं स्नांस्न
नाम्नपि पुनरप्यपकृष्यन्ते ह्यपुत्रनिषेधनात् । द्विश्राद्धानन्तरं तं निषेधादित्यर्थः । अथ रात्रौ जननमरणे
रजोदर्शनादौ चत्रपःपक्षाः । अर्द्धरात्रपर्यन्तं पूर्वदिनगणना । वा त्रिभागापरात्रे भागद्वयं पूर्वदिनां । नगीतं वास
योदयात् पूर्वदिवामेवेति वा । तत्र हारीतकश्यपः । उदिते तु पर हारीतार्थे गृह्यपते रजः । जनने वा विपत्तौ वापस्मा
हल्लस्य शावरी । अर्द्धरात्रावधिः कालः सूतकादौ विधीयते । रात्रिं कुर्यात् त्रिभागं तु द्वौ भागौ पूर्व एव तु । उत्तमोंशः
प्रभातेन युज्यते मृतसूतके । रात्रावेव समुत्पन्ने मृते रजसि सूतके । पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविरिति ।
अत्र देशाचाराद्व्यवस्था । ग्रन्थान्तरे । रजोदोषे समुत्पन्ने सूतके मृतकेपि वा । पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः ।
अथ रात्रौ । दाहादिनिर्णयो रेवकानीवे । रात्रौ वा रात्रिशेषे वा स्त्रियं पन्ने चेद्द्विजातयः । दाहं कृत्वा यथा यामा येद्वो पिंडो
निर्वपेत्सुतः । निगमः । मध्याह्ने स्नात यथा रात्रौ दाहः प्रायश्चित्तकर्मणि च । नवश्राद्धं च नो कुर्यात् ताकृतं निःफलं तां
यजेत् । रात्रिमृतस्य रात्रावेव दाहः । वपनं तु प्रातः । उक्तं च स्मृतिसंग्रहे । रात्रौ दद्यात्तु पिंडं तं कृत्वा वपनवर्जितं ।
वपनं नेष्यरात्रौ स्मृत्वनी वपनक्रिया । दिनवच्च सुदिनमृतस्याः स्मा दिना रात्रिदाह निषेधार्थी तथा । यावं रात्र

५

९८

६८

षितेन्द्राबुक्तलाक्षछान्नरहेस्मृतः। भ्रातिरन्त्रावल्यां॥ दशाहान्तर्द्दर्शपातेम विष्णुपुराणे। पक्षाशौचं च नत्र
सुपरिदर्शप्रपद्यते। समाप्यचोदकं पिंडानूत्सानं मात्रं समाचरेत्॥ मातापितृविषये तु गौतमः॥ अन्तर्दशा
हे दर्शश्चेत त्रसर्वं समापयेत्। पित्रोस्तुपावदाशौचं स्यात् पिंडतिलाञ्जलीन्। पित्रोरित्येकशेषः॥ पक्षगा
लवः॥ पित्रोराशौचमध्येपि पदि दर्शः समापयेत्। तावद्देवोनरं तं त्रं पर्पं च सम्यग्महासरं मिति तहोसं समुच्चोप
हाकरोति तद्विषये आपस्तंबविषयं चेति पारिजाते। पराशरमाधवीये निर्णयामृते च। अहान्तरं दर्शे मातापि
तृते त्रस्मापि समाप्तिर्न तु अन्तर्मध्ये दर्शपातेन द्विषये मेव गौतमवचनं। अन्येषां तु पराकृता चित् दशाहम
ध्ये दर्शपाते तं त्रसमाप्तिरिति दाहकाले ग्निनाशे दाहष्टे अग्निमथित्वा तेन दहेत्। भूर्भुवः स्वः स्वाहेत्याहुतिं हुत्वा
लौकिकेनाग्निना वा। तद्देहं महाजले वा क्षिपेत्। दशाहं प्रेतपिंडं दत्वा त्वालातानुको अन्नपिंडस्य अहो पवासः स
पिंडस्यैकाहः भस्मादिग्रुणौ द्वयोः प्रेतपिंडं कुर्यात् तौ संचयनाद्यौ कुर्यात् संगोत्रं। ऊर्ध्वं कापत्त्रये। अन्येषां प्रेता
शौचिनां पूर्वं संचयनात् त्रिरात्रं। पश्चादुपवासः। इत्यादिस्मृत्यंतरे मोऽक्षे पं। अन्यपुरुषं। कायो। पत्न्या मपि दहे
देवं भर्तुः पूर्वं मृता यदि। अनग्निकां दहेदेवं कपालेन हविर्भुजा। अग्निवर्णकपालं तु कृत्वा तत्र विनिक्षिपेत्॥

राम०
९८

कश्यपाहितनोपस्तुनानःस्तुकपालजः। अनुपनीतस्याप्येवं स्मृतं नरो। गृहस्थो ब्रह्मचारी च विधुरो विधवा स्त्रि

यः। ॐ पालनश्चोत्र पनस्तुपाग्निश्च कपालजः। देवलः। वाडवाग्नि रमेध्याग्नि सूतकाग्निश्च कर्हिचित्। पतिताग्नि

श्चिताग्निश्च न शिष्टग्रहणो विना। आहिताग्नेर्देशान्तरमरणे विशेषमत्रैव पस्मि देशे स्थिते वह्निस्ततोऽन्यत्र

मनोपदि। वहः पथि हतः कार्य पूर्णाहुतिरथापि वा। अग्निहोत्र पनवस्तेन पागो स्तुपपो ध। अशरीराहुतेस्त

स्मापमाहो मदश्यते। अनग्निका अपि होतव्यं तरसंभवेतथ्या हृत्लपदेऽग्नी पेत पयाग्निषातराहुतिः। विशे

षास्तु जुहुयाद्दर्शपर्व ना। पक्षहोमविधानतः पत्नीमेव तु जुहुयोऽस्या येकालाहुतीरपि। मासं प्रियेत वैश्वानराहुती

र्जुहुयाद्दथा तत्पत्नीमेव तु हामास्वातः कालाहुतीरपि। स कृत्हृहोत मन्त्रेष्टमित्रं तत्र व होमयोः। दर्शे वापि प्रकु

र्वीत स्थालीपाकं तदैव तु। होमद्रव्ये न कर्तव्यो पुनर्यदि समजीवति। म्रियेतो पवसथ्ये क्रिवे वैतनपात्रयेनत्र।

म्रियेत ताः क्षिप्तेनेनि सहोमद्रव्येह विःस्तु च। तद्यानि शेषद्रव्याणि तथा तानि देहेऽग्न। वहिष्याहिते षेवह

विस्तु म्रियते यद्या पा मांसं प शिष्टहोतानि देवतानां हवींषु विस्तु। वतु र्थ्यन्ता नि नामानि नाव तीनां वदेह थाप्स्वा

हाकारेण युगपत्समर्वाणि जुहुयाद्दथ्योनेहंत्तिष्ठतदाद्य शेषं कार्यमिति स्थितिः। एकोद्दिष्टं सपिंडं चक्र

पिंडं तु विधीयते। नालिकेरप्रमाणं तु प्रत्यहे मासिके तथा। तीर्थे दर्शे च संग्रामे कुक्कुटांडप्रमाणतः। महा
लये गयाश्राद्धे कुर्यादामलकोपमं। अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचैलः स्पृष्ट्वाग्निं घृ
तं प्राश्य विशुध्यति। घृताभावे तु गायत्र्या दशकृत्वः पिबेदपः॥ ज्येष्ठेन वा कनिष्ठेन सपिंडीकरणे कृते। देशां
तरगतानां च पुत्राणां तु कथं भवेत्। मृता तु वपने कार्ये द्वादशाहांते तिलोदकः। ततः सपिंडीकरणं कुर्यादेकाद
शेऽहनि। द्वादशाहे न कर्तव्यमिति शातातपोऽब्रवीत्। नामग्रपर्यन्तमारे। ब्रह्मचारिमरणे मनपसानां सपिंडीक
रणं नास्ति। अन्नत्तेषामेकोद्दिष्टमनुक्रममतानां यवहितेः सापिंड्यं कार्यं न वा। केचित्सर्वं तु सपिंडनमा
हुरिति। पतीनां प्रेतत्वं नास्ति। अतस्तेषामेकोद्दिष्टं न सपिंडीकरणं। किंतु एकादशेऽहनि पार्वणं कार्यं दंडग्रह
णं लूर्वमते तु द्वादशाहादि सपिंडानां तं सर्वं विधिना कार्यमेव। अपोगरत्ने उपयोगिको निर्णयः॥ ॥अथ ब्रह्मचा
रीमरणे विधानमालायां विशेषः। येषां कुले ब्रह्मचारी निधनं प्राप्नुयाद्यदि। तत्कुलं रूपमा प्नोति
सोऽपि दुर्गतिमाप्नुयात्। ग्रहत्वं प्राप्नुयाद्बोधि द्धमेना वरितं वसेत्। त्रिंशद्धो ब्रह्मचारिभ्यो दद्यात्कौपिनकां गमः
त्रवानं। हस्तमात्रा कर्णमात्रा दद्यात्कृष्णाजिनानि च। पादुका छत्रमाला च हिगोपवीतं हनमेव च। मणिप्रवाल
तस्य। पितृस्य वंशस्य गतिमिच्छन्महीयसी। विधानं वै विधायाशु औ ई दे हि कमाचरेत्। मृतस्य त्रिपमाणस्य षड्विंशति मावरेता

७७

मालाधनूज्ञसूत्राणि चार्पयेत्। मंत्रैस्तल्लिंगकैस्त्वेव ब्रह्मणायुज्यसिद्धये। अभावे वर्णिनां पुत्राः गृहस्थाः
साधवः शुभाः। एवं कृते विधानेन विघ्नस्तस्य न जायते। ब्रह्मचारीमरणे ऽर्कविवाहः शौनकः। ब्रह्मचारि
णो रीतिकृच्छ्राणि समाप्तनः।। तत्राकीर्णे शेषस्य प्रायश्चित्तं प्रशांतये। द्वादशाब्दं षडब्दं वा त्र्यब्दं शक्त्या
थवा चरेत्।। ततो व्रतविसर्गाख्यं विधिं समाचरेत्। स्नातको ब्रह्मचारी च निधनं प्राप्नुयाद्यदि। तं पोऽस्य
वार्कविधिना तं पोज्यो नो परस्परं। अथाग्निमुपसमाधाय एवं गुणे त्यादि अमुकगोत्रस्यामुकनाम्नो
मृतस्य ब्रह्मचारिणो व्रतविसर्गं करिष्ये। तदंगतया विहितं हिरण्यपनरादीश्राद्धं करिष्य इति संकल्प्य तं
कृत्वा ऽन्वाधानाद्याधारांतं कृत्वाज्येन जुहुयात्। व्याहृतपश्च तत्वः। ॐ अग्नये व्रतपते स्वाहा।। इदं० अग्न
ये व्रतानुष्ठानं फलसंपादनाय स्वाहा। इदं० विश्वेभ्यो देवेभ्यः स्वाहा। इदं० ततः स्विष्टकृदादि समाप्य पश्चा
दर्कसमीपे। स्वयनार्कीशाखापानं। प्रार्कं ब्रह्मचारिणो हरिद्रयानि लिप्य पीतसूत्रेण वेष्ट्य वस्त्रयुग्मे
नाच्छाद्याग्निमुपसमाधाय एवं गुण० अमुकगोत्रस्य सादिस्त्रौ धर्वदेहिकार्थम् अर्कविवाहं करिष्ये। तदंगं
हिरण्यपनरादीश्राद्धं करिष्ये। इध्माद्याधारांतं कृत्वाज्यहोमः। अग्नये स्वाहा। इदं० ॐ ब्रह्मणे स्वाहा। इदं। वि

७०

वाहविधियोजकायस्वाहा।इदंयस्मैतं कामकामायपवपंसं आउज्ञामहोनमसमभ्यं कामदत्वाःयेहं घृतं
पिबास्वाहा।इदंकामाय।ततस्त्रोव्याहृतयः।ततस्विष्टकृदादि।अर्केणशालो ब्रह्मचारी शवंवतुषाग्निना
विधिनादहेत।शालांप्रवाहयेदित्यसे॥ ॥इतिब्रह्मचारीमरणविधिः॥ ॥अथवस्तुगणश्राद्धं॥
इदमपाष्टवस्त्रदेशपस्नेतस्येनकार्यं।शक्तेनाष्टौब्राह्मणभोजनीयाः।अशक्तेनैकः।वस्तुनामकानि।ध्रु
वोध्वरश्चसोमश्चआपश्चैवानिलोनलः।प्रत्यूषश्चप्रभावश्चवसवोष्टौप्रकीर्तिताः।अत्रापिपिंडदाना
मभावः।वस्तुगणश्राद्धंकेषांकिमर्थंकेनोपकारार्थंकर्तव्यं।मनुः।नवर्द्धयेदघाहानिप्रत्यूहेनाग्निषुक्रि
याः।नचतत्कर्मकुर्वाणोसनाभ्योप्यशुचिर्भवेत।अस्यार्थः।येषांस्वकर्मनिष्ठायां।अलसमपप्याप
कंआशौचमुक्तंतेरालस्याहिनास्वकर्महीनंवद्विजवरधिकस्याशौचंनकर्तव्यमित्यर्थः।प्रत्यूहोविघ्नः।
तेनाग्निक्रियाअवश्यंकुर्यादित्यर्थः।प्रकारांतरमाह।नचेत्यादि।अग्निहोत्रहोमासामर्थ्येऽग्निहोविणो
होमकरणेपुत्रादिरपिशुचिर्भवेदित्यर्थइतिदेवापद्धतौ।अथस्मार्तकर्मण्येविषयज्ञमाहस्याधिकारः।श्र
क्तोत्रैनजावालिः।उभयत्रदशाहानिसपिंडानामाशौचंकं।स्नानोपस्पर्शनाभ्यामातान्अग्निहोत्रार्थंमहेति

राम०
७०

हेतिमन्त्रस्यार्थः। उभयत्र ज्ञातसूतके मृतके च स्नानोपस्पर्शनाभ्यां स्नात्वा नाचमनाद्धस्ता अग्निहोत्रे धिका
री भवति। तदर्थः। गृहागतमधुपर्कस्य यजमानाद्वत्विजः। पश्चाद्दशोत्पत्तिते चेत् न भये दिति निष्कर्षः।
पदासपिंडीकरणे द्वादशेहनि कृतं मासिकानि चापकृष्टानि तदा पुनर्मासिकानि कार्याणि। उतनेनेति त्रिंश
ता पाप्माह। सापिंडो द्वादशस्वात्किं कुर्यात्काले स्वके पुनः। अह्नां तं वत्सराणां वर्षं सापिंड्येनानिषोडशश्राद्धा
नि स्वके स्वके यथाविधि काले पुनः कुर्यात् न दाहाग्निरां। यस्मात् वत्सरात्स्वर्गात्कृ विहितान्तु सपिंडनः। विधिवदानि कु
र्वीत पुनः श्राद्धानि षोडशेति। एकादशे द्वादशेहनि त्रिपक्षत्रिमासिके। षष्ठे चैकादशे वाहे सपूर्णे वा सुनाग
मे। प्रथमाब्दस्य मासिकाः सामृताहाद्द्वादशेहनि। सपिंडीकरणं तत्र कुर्यात् दिवसु तो ग्निमान्। मृताहात्कृत इति म
र्यादायां पंचमी तृतीया हात्पूर्वदिनमारभ्येत्यर्थः। अथ त्रयोदशेह्नि प्रातः स्नात्वा। प्राणानायम्य तिथ्यादि सं
कीर्त्य अमुकगोत्रस्य अमुकशर्मणः पितृलोकगमने सुखसिध्यर्थं अमुकगोत्राणाम् अमुकशर्मणाम् अस्म
त् पितृपितामहप्रपितामहानां वसुरुद्रादित्यस्वरूपाणां प्राप्त्यर्थे श्राद्धं सपिंडकं तदैवं करिष्य इति संकल्प्य दत्रहणः पा
धादिसर्वं श्राद्धं पार्वणवत्कुर्यात्। पक्वान्नेनामेन वा कुर्यात्। ततः कर्मांगस्नानं कुर्यात्। देशकालौ निर्दिश्य

७१

मम सपरिवारस्य सकलारिष्टोपशमनपूर्वकमायुःसिद्ध्यर्थं चं गणेशपूजनपूर्वकं स्वस्तिवाचनं करिष्ये। यथा शाखं स्वस्त्ययनं वाचयित्वा शिखोग्रहीला बंधुभिः सह भुंजीत। अनंतऊर्ध्वश्रीखंडधारणं तांबूलमहणं च निकुर्वीत॥ ॥श्रीमत् गोमतीवालज्ञातीयःपोतिविदहोवालाल्मजविम्बनाथकृते श्रौर्ध्वदेहिकम कृतिःसमाप्तम्॥ ॥शुभं भवत्॥ ॥ ॥ ॥ ॥ ॥ ॥

कृ पा० १० २०

या० सर्वसास्त्रनोदेव दत्तस्येदं पुस्तकं

२०२५